अतस्तस्य द्वादशवार्षिके नववार्षिकं प्रयोजकस्यैकेनैव षड्वार्षिकं कुर्वीत अनुमन्ता पुनः
सार्द्धपादे सार्द्धं चतुर्वार्षिकं निमित्तिनैकपादे त्रिवार्षिकं अतएव सुमन्तुः निरस्कृतो
यदा विप्रो हतात्मा नैमित्तिको यदि निर्गुणः सहसा क्रोधाद्गृहक्षेत्रादिकारणात् त्रिवा
र्षिकं व्रतं कुर्यात् प्रतिलोमां सरस्वतीं गच्छेद्वापि विशुद्ध्यर्थं तस्यापस्येति निमित्तिनं अस्य
र्थे निर्गुणेन विप्रहनने त्र्यब्दं निर्गुणे परि क्रोधाद्वैरस्यतत्पत्नीनि निमित्तेनतु भर्त्सितः स्वत
न्त्रः [illegible] कुर्यात् क्रुद्धो विप्रहद् यदि यदा पुनर्निमित्तान्यतेगुणवान् आत्मघाती चा
त्युत निर्गुणस्तदैकं वर्षमेव ब्रह्महत्याव्रतं कुर्वीत केशश्मश्रुनखादीनां कृन्तनवपने
वने ब्रह्मचर्यं चरन्निशोऽवर्षेनैके न शुद्ध्यतीति तेनैवोक्तत्वात् अनयैव दिशानुग्राहकप्र
योजकादीनां अनुग्राहकप्रयोजकादृपस्य सामर्थ्ये प्रायश्चित्तं कल्प्यं अस्यावेकल्पना
यां प्रयोजयिता अनुमन्ता कर्त्ता चेति स्वर्गनरकफलेषु कर्मसु भागिनो यो भूयः प्रारभेत त
स्मिन्फलविशेष इत्यापस्तम्बीयवचने [illegible] तथोद्गात्साहकादीनामपि देशप्रायश्चित्ते
कल्प्यं यथा हेतामेतो पदेशाचतथा प्रतिपादकः प्रोत्साहकः सहाय

मि. त.
न.
१००

११

त्वद्विगुणमेव न तस्य तु ब्राह्मणे तु न मातिदिशोत इत्येतद्वाक्यविहितद्विगुणद्वादश प्र... वार्षि
कव्रतचर्याशक्तस्य वेदितव्यं प्रायश्चित्तस्यातिगुरुत्वात् नवनाहत्नद्वादशवार्षिक
विषयेन त्रयं हि द्वादशाब्दे नान्ये केके प्राजापत्यमिति गणना यो प्राजापत्यानां षष्ट्य
धिकं शतत्रयं भवति यद्यपि प्राजापत्यत्र्यहं उपवासाधिकं तत्र्यहत्रयं चैत वासजप
धारणा वन्याहारत्वादिनियोविशेषयुक्तत्वाद्युपवासाभावे ऽप्येकैकस्य द्वादशाहस्य प्रा
जापत्यतुल्यत्वे नतस्य प्राजापत्यक्रियाशक्तो धेनुं दद्यात् हि चतुर्णः गवामभावे दा
तव्यं तन्मूल्यं वा न संशय इति न्यायेन शतिप्राजापत्यमेकैकस्याधेन्वां दीयमानायां धे
नूनामपि षष्ट्यधिकं शतत्रयं भवति तथ्वनः सहस्रमेतापंच्याक्त एव विषयाफलकः
पटीयस्त्वं वचने विश्वप्रमाण्ये द्वादशसंवत्सरान् षट्त्रीन् सार्द्धसंवत्सरं चत्रन्तान्या
दिशन्नेषां मते गोसहस्रं तत्र्द्धं तस्यार्द्धमर्द्धं चदद्यात्सर्वेषां वर्णानामानुपूर्व्येणनिदा
दशवार्षिकगोसहस्रयोः समत्वं पविधिपरं तदाचार्यादिहननविषयं द्रष्टव्यं तस्यापि
गुरुत्वात् तथा च वद्वः समममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे आचार्ये शतसाहस्र

१००

षष्ठेव्वाधिकारात् अतस्तद्दोषमपि प्रायश्चित्तं पित्रादिभिरेवाचरणीयं ९ अज्ञानस्तु त्याद्यसं
स्कृत्य वेदमध्याप्य पूर्वनि विस्थाप्यादितिन स्वैव शुद्धिमाचरणेधिकृतत्वात् यत्र पुनः कश्चि
त्सिद्धात्मा णवेध प्रयोजकभावमापन्नस्यान्यस्मिन्स्मातान्ताकर्तृते गुरूलघुप्रायश्चित्तसंक्षि
प्तानस्त्वत्रद्वादशवार्षिकादिगुरुप्रायश्चित्तात : पातित्व : प्रयोजकसंबंधिलघुप्राय
श्चित्तस्यापससगात्कार्यसिद्धिः न चैव स्वायविशेषणात्स्तु कल्पेन महतापि सिद्धिः स्यादि
त्याशंक्यनीय अत्रत्वेन : पातित्वपादुष्टाने विशेषणानत्वगमात्स्वसंगात्कार्यसिद्धिरुच्यते
नचलत्यात : पातो महान्कल्प इति अतः प्रसंगात्प्रकान न चैवत्रवधजनितकल्म
षत्यायश्चित्तेन कथं विस्तुमित्रवधोत्पाद्य पापनिर्हृतिरितिवाच्यं वैद्याधिक्ह्रेण
स्यातेत्रत्वात् अतोपथाकाम्यानि योगानि ष्ठानपार्थं मत्रक्षितेनाग्रेयादिभिर्नित्यानि योग
निष्पातिस्तत्रुघे प्रयोजकभावमापन्नस्यान्यस्मिन्स्मातान्ताकर्तृते गुरूलघुप्रायश्चित्त
स्यापिकार्यसिद्धिः यत्तु नमृधमांगिरोवृत्तं गवांसहस्रविधिवत्पात्रेभ्यः प्रतिपाद
येत् ब्रह्महा विशुद्धोत सर्वपापेभ्यएवचेति तत्सवन स्यगुणवद्वास्त्रणांविषयंपत।

मि॰ ता॰
प्रा॰
१९१

ने गृहीते नातिगाढेन ल्लिङ्गे स्वर्गादिसिद्धिनिमित्तं प्राणत्यागस्य वा स्वर्गः स्यादिति कल्पनीयं
इतरथा ग्रहणविधेरानर्थक्यप्रसंगात् नापि समुच्चयः उपदेशातिदेशाभ्यामेकत्र समु
च्चयो न संभवति उपदेशावगतनैरपेक्ष्यस्य बाधप्रसंगात् न चांगांगिभावः क्रत्वादि
विनियोजकप्रमाणाभावात् अतः परस्परोपमर्दपरिहाराय विषयव्यवस्था कल्पनी
या विनाशावज्ञातिशक्तिग्रहणपक्षे तत्पाकल्पनीया ज्ञातिशक्तिग्रहणपक्षे तु सकलसुधीष्ट
नेन तथा अनुबन्धादिविषयप्रायश्चित्तेषु प्रकल्पयेन देवलस्मरणात् ब्राह्मणस्य परि

200

त्राणाद्गवां द्वादशकस्य वा तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥ ३८ ॥ एवं
कस्य ब्रह्महत्याप्रायश्चित्तस्य नैमित्तिकसमाप्त्यवधिमाह चौरव्याघ्रादिभिर्व्यापा
द्यमानस्य ब्राह्मणस्यैकस्याप्यात्मत्राणेनेतरेण वा प्राणत्राणे करोति गवां वा द्वाद
शकस्यासावपरित्राणेपि द्वादशवार्षिके शुद्ध्येत् यद्यपि प्राणत्राणे प्रवृत्तस्य देहको नैवाभि
पतेत्तथापि शुद्ध्यत्येव अत एव मनुना ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजेत्
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति गोब्राह्मणरक्षणेन दृष्टमरणं चवृथयत्र

१९१

सोंटयेटत्तमदप्यमिति श्रुतिपाघोक्तवान् समद्विगुणसाहस्रमानेनैव च पथाक्रमे द्वानेफ
लविशेषस्याद्दिसायां नष्टे देवहोति तथा पलेवेन द्वादशवार्षिकमुक्तोऽन्त मास्मिन्नेव वि
षये गुरुहत्याशोत्रिये वा पतदेवव्रते चरेदिति तत्र यावज्जीवमावर्त्यमानेऽव्रते यदा वेऽ
एपवानर्थुएपवासंभाव्यते तदा तत्रासमर्थस्य वृद्धस्य तस्य समर्थपोऽप्युक्तः द्वादश
वार्षिकव्यतिरिक्तानां तत्समेत्तपराशराद्युक्तानां प्रायश्चित्तानां मन्नरव्यवस्थाव
त्वामः ननु च द्वादशवार्षिकादिकल्पानां व्यवस्थाकुतो वाशितानन्तावद्द्वादशवार्षि
क विधायके वाक्ये रितिप्रयुक्ते तत्राश्रतीतेः न च वाच्यं प्रमाणवगते गुरुलघुकल्पा
नां वायो मा भोदीति व्यवस्थाकल्पनं तदिति विकल्पस्य गुरुत्वयोगोऽभावानामन्यतं
मास्यपणेनापि वाद्यस्य सहपरिहरत्वात् यद्वोच्यते ततावद्द्वादशवार्षिकस्यैतद्दशीना
दीनां विषमकल्पानां विकल्पो विकल्पते विकल्पाश्रयेन गुरुकल्पानामनुष्ठाना
सम्भवेनानर्थक्यप्रसंगात् न च षोडशाग्रहणाग्रहणवद्विषमयोरपि विकल्पोपप
त्तिरिति वाच्यं यतस्तत्रापि समति सम्भवे ग्रहणमेव फलं कल्पितं यद्वा षोडशिग्रहण

मि॰ [illegible]द॰
रू॰
१२
से

स्यादेवाश्वमेधावभृथस्नानाद्वा पूतो भवतीति अत एव मनुना कृतवापनो वा निवसे
दिति द्वादशवार्षिकस्य गुणविधिश्रुतस्य ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्य
जेत् मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च इत्यादिना मध्ये ब्राह्मणत्राणाधिक
मभिधाय एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपो
हतीति द्वादशवार्षिकमेवोपसंहृतं ननु च ब्रह्महत्यापापः शुद्धिमाप्नुयादिति ब्राह्मण
त्राणादीनां द्वादशवार्षिकेण सहैकफलत्वावगमात्तत्स्थानत्वमेव फलं न पुनरंगत्वं
किंच प्रधानविरोधित्वादपि नांगत्वं प्रधानानुग्राहकमंगं भवति न च प्रारब्धद्वादश
वार्षिकस्यादेर्विधानेपि नैकार्यविधानेन गम्यते यथा सत्रायागूर्य विश्वजिता यजेते
ति सत्रप्रयोगप्रवृत्तस्य तत्परिसमापनात्मकस्य विश्वजित्स्थाने अतोपि स्थानत्वमेव
युक्तं यथा त्रिषवणस्नानाद्यभावादीनां न चैतेषामपि द्वादशवार्षिकोपक्रमोपसंहार
मध्यपठितत्वेनांगत्वमिति शंकनीयं यतः सन्ध्यपि मध्यपाठे विस्तानप्रयोजकत्वेन
प्रयोजनाकांक्षाविरहान्न परस्परमंगांगित्वं फलं यथा सामिधेनीप्रकरणमध्यवर्ति

201

॥ १०२

पाते तथापरकीयाश्वमेधावभृथ्याज्ञिककर्मागमस्तत्स्नानसमयेस्वयमपिस्नाताःश्राद्धस
हगायाःशुद्धिःप्राप्नुयात् स्नानेचसकल्मषविमोचकंयात् तथाचमंत्रः शिष्ठा
वाश्वमिदेवानांनरदेवसमागमे स्नमेनोश्वमेधेस्नाताहयमेधेविमुच्यानइति श्रुति
देवाब्राह्मणाक्षत्रियास्तेषांनरदेवेनराज्ञायजमानेनसमवायेसोयमेनः शिष्ठा
विमोच्याश्वमेधावभृथेस्नातःशुद्धोनपदिनेरजस्तातोभवति अश्वमेधावभृथाग
तानतःशुद्धतानःस्नातःसद्यःपूतोभवतीतिशास्त्रस्मरणात् अश्वमेधावभृथग्रहणम
श्विष्टमध्यानांपंचदशरात्रादिकंदैवतेरात्मसंस्थिष्टसमाश्रिकानांवासर्वमेधादी
नामुपलक्षणं अश्वमेधावभृथेवान्यपजेष्वपिश्विष्टेतेष्टितिगौतमस्मरणात्तथापं
चपक्रांतद्वादशवार्षिकस्यकथंचिद्ब्रह्मणपरिज्ञाणादिकेकृतेतोऽप्रतसमाप्यवधिर
च्यते यथासारस्वतेसत्रेब्राह्मणप्रसवर्णप्राप्नोत्यावभृथमेकशतानांवागवांसहस्र
मभावेसर्वस्वदानेगृहपतिमरणेवेतिनपुनःसत्रेशेषापनिष्ठितेंतरे तथाचशास्त्रंः
द्वादशवर्षमुहूर्तब्रह्मत्यानवाब्रह्मस्वंमोचयित्वागवांवाद्वादशानामपरिज्ञाणं।

मि. क्ष.
प्रा.
६३

कुष्ठादिव्याधिनाभ्यस्तं पीडिते ब्राह्मणे गोवा तथाविधोपथि दृष्ट्वा निरातंकेनोपेक्षितेनाव
श्यहायथुविधिमवेन् न तु ब्राह्मणस्य परित्राणादित्यत्र पठ्यते ब्राह्मणरक्षणेन तदेव किमर्थं उ
न उच्यते ब्राह्मणगामश्चापि वेति सत्यमेव किं त्वात्मप्राणपरित्यागेनाथ स्तेनवाक्ये ब्रा
ह्मणरक्षणमुक्तं मध्ये नाऽपि न रोगधदानादिनेति विशेषः अमुनैवाभिप्रायेणोक्तं मनुना
विप्रस्य तन्निमित्ते वा प्राणलाभे विमुच्यते इति ३८ किंच विश्वस्यापहृतं सर्वं स्वं तयावसी
दतः सर्वं धोद्धयोः हिरण्यादिकं चौरैर्हृतं साकल्येनानीयप्रत्यर्पणं यः करोति स विशुध्य
ति शानयने प्रवृत्तः सर्वं चौरैर्हतं तेनावा पादित्वा तन्निमित्तं ब्राह्मणं सर्वं स्वानुपन्ना यं तत्र
युध्यमानः शस्त्रैः हतो मृतकल्पो जीवन्नपि विशुध्यति शस्त्रैरिति बहुवचनं त्वतबहुत्व
प्राप्त्यर्थं अत एव मनुनाऽवरं त्रिरिति राज्ञो वा सर्वस्वमवजित्य वेति अवरग्रहणं कृतं अ
स्य श्लोकद्वयोक्तस्य कल्पपंचकस्य ब्राह्मणरक्षणरूपत्वे नान्तराब्राह्मणेमोचयित्वा नेन
णोक्तवचनेन क्रोडीकृतत्वात् द्वादशवार्षिकसमाप्त्यवधित्वेन विनियोगात् ज्ञातव्यं ४०
लोमभ्यः स्वाहेत्येवं हि लोमप्रभृतिं चैतत्त मज्जानां जुहुयात् द्वाभिर्मन्त्रैरभिपत्याक्रमे ४१

102

६३

नामापि निर्दिष्टानामग्निसमिंधनप्रकाशनेनैन सामिधेनीभिः सहैकार्थ्याणांगेन
सामिधेन्यंगत्वेन चैकांततोग्निप्रवेशादीनां द्वादशवार्षिकमध्यपाठः वसिष्ठगोत्र
मात्रविभिरेषां द्वादशवार्षिकप्रकरणात्प्रागेव पठितत्वात् ३८ एवं च सत्यप्रकरणेपि
तमग्निनालत्वेणास्तुमर्हतो वा स्यात् ग्रामस्थानामनग्नीनां वेति श्रुतिवाक्यं वा शाहुः पठि
तः तथा श्रुतिशापेक्षत्वमेवोपसंहृतं ते ग्रतेः न्यूतममाख्यापविधिविधः समुहिते अह
हत्याकृतेपापेभ्यो पोहन्यात्मवित्रयेति श्रुतेग्निप्रवेशादीनां स्नाते अमेवफलं श्रुतञ्च
ब्राह्मणब्राह्मणादेरेष्ट्यकफलताङ्गत्वमिति उच्यते पोरहतं मैनं देवता ब्राह्मणमोच
यितव्यादिनाश्वेचनेनांगत्वावगमात् अंगस्यैव गतेः प्रधानद्वारेण फलसंबंधः
न च प्रधानविरोधः एतो ब्राह्मणब्राह्मणवधिकस्यैव कृतानुष्ठानस्य फलसाधनत्वेवि
धीयत इति न विरोधः ३७ दीक्षितो ब्राह्मणमधस्ते ब्राह्मणगामघ्या पिवा ह्र्ह्या पर्याति निरा
तेके कृतावाव ब्रह्महाणुचिः ३९ यानो पविश्य सर्वं स्वहस्तेन गृहीत एव वा नाग्नि मिलेत्ततः
शास्त्रेषूक्तो विन्नापि विशुध्यति ४० किं च दीर्घेण बहुकालव्यापिना तीव्रेण दंडः सहे नाम धेयेन

वचनैर्योनिर्देशोपिसलोमादीनांनदेवतानेकल्पनेऽज्यप्रकाशनेनैवमेवंजातलोमहोमसाधना
र्थोपपन्नैः। किंतल्लोममभिमंत्रणेवाशायइत्यादिवाक्यशेषमेवपर्यालोचनयामरुतोरेवहविः
संबंधावगमाद्देवतानेकल्पनेऽनुयुक्ताल्लोमादीनिसामर्थ्यात् साधितानावदावरु
त्पद्देवतानाष्टौहोमानकुर्यात्तेनवैश्वलिपेत् यतोपदेशात्स्त्रिरुक्तं यनादिश्यद्व्यतादाज्य
हविष्कोहोमइतिनत्वेतित्रृप्येवाक्यमिसुपेतलोपेरुद्रादित्यानेनाग्निसिद्धंभ्रूणहात्रि
सुपसमाधायेति७नरम्निग्रहणंलौकिकाग्निप्राप्त्यर्थं फलंचैतनतपतितानांग्रीनांप्रतिपत्ति
विधानान् गार्हितानिस्तुपोविप्रामहापातकवानभवेत् प्रायश्चित्तेनैशुद्धोततस्त्रीनो
तकागतिः वैज्ञानेप्रतिपन्नोपेशालाग्निशमपेतुधः रेतुशानःस्मरणात् तथामहापा
तकसंफलंकोदेवानस्मारंग्निमात्मादि७ञादिपालपेटग्रीसुजकंस्मादोषसंतपात् प्रायश्चि
त्तेनजपाद्यः ऊवंन्नाग्निपतेपटि गरहेनिर्वापपेक्रोनमत्रस्पत्सपरिकृष्टमितिकात्या
यनस्मरणात् तत्रप्रदेपत्रीत्यापोत्यापविरधोश्च विनकर्त्तव्याः यथाहमनुः प्रासेदा
त्मानमग्नावासमिद्धेत्रिरवाक्शिराइतिगोतमेनाप्यत्रविशेषोदर्शितः प्रायश्चित्तम

203

प्रायश्चित्तांतरमाह लोमभ्यः स्वाहेत्येवमादिभिर्मंत्रैर्लोमप्रभृतिमज्जांतानेतज्जुहुया
त्इतिशब्दः करणत्वनिर्देशार्थः एवंशब्दः प्रकारार्थः एवंशब्दप्रकारार्थस्सूचनार्थः इह
शब्दः स्मृत्यंतरप्रसिद्धत्वगादीनां प्रभृतिशब्देनादिष्यमाणानोद्योतनार्थः अतश्च लो
मादीनि होमद्रव्याणि चतुर्थ्यंतानि निर्दिश्यंते स्वाहाकारं पठित्वा तैर्मंत्रैर्जुहुयात् तेच हू
यमानद्रव्याणि लोमत्वगलोहितमांसमेदः स्नाय्वस्थिमज्जानामष्टसंख्यत्वादष्टौ मंत्रा
भवंति तथा च वसिष्ठः भ्रूणहाग्निमुपसमाधाय जुहुयाल्लोमानि मृत्योर्जुहोमि लोम
भिर्मृत्युं वाशय इति प्रथमं त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वाशय इति द्वितीयं लोहितं
मृत्योर्जुहोमि लोहितेन मृत्युं वाशय इति तृतीयं मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वा
शय इति चतुर्थं मेदो मृत्योर्जुहोमि मेदसा मृत्युं वाशय इति पंचमं स्नायूनि मृत्यो
र्जुहोमि स्नायुभिर्मृत्युं वाशय इति षष्ठं अस्थीनि मृत्योर्जुहोम्यस्थिभिर्मृत्युं वाशय
इति सप्तमं मज्जानं मृत्योर्जुहोमि मज्जाभिर्मृत्युं वाशय इत्यष्टममिति अत्र लोम
प्रभृतीनि वेतज्जुहुयादिति लोमादीनां होमद्रव्यत्वावगमात् लोमभ्यः स्वाहेतिस्वत्यपि

मि॰ न्हु॰
नु॰
१०५

104

नापि शुद्ध्यति यथाह मनुः यजेत वाश्वमेधेन स्वर्जिता गोसवेन च अभिजिद्विश्वजिद्भ्यां
वा त्रिवृताग्निष्टुतापि वेति अश्वमेधानुष्ठानेन तद्विषयस्य सार्वभौमस्यैव यजेत वाश्वमेधे
न तद्विषयत्वमहीपतिरिति पराशरस्मरणात् नासार्वभौमो यजेतेत्यसार्वभौमस्य प्र
तिषेधदर्शनाच्छूद्रस्य चाश्वमेधानुष्ठाने सार्वभौमस्य कामकारकृते मरणान्तिकप्राय
श्चित्ते महापातककर्तारश्चत्वारोपि मतिपूर्वकं अग्निप्रवेशपक्षे शुद्ध्यन्तीति षिद्धानां वा मह
तिक्रतावितियमेन मरणफलाग्निप्रवेशतुल्यतया महाक्रतोरश्वमेधस्य निर्दिष्ट
त्वात् स्वर्जिदादयोऽन्यस्यैव वर्णिकस्याहिताग्नेरिष्टप्रथमयज्ञस्य द्वादशवार्षिकेण
सह विकल्पितेन च स्वर्जिदादयश्चैमादाने प्रथमयज्ञानुष्ठाने वा कार्यं पतितस्य द्वि
जातिकर्मस्वनधिकारात् न च मध्योपासनवद्विरोधः इति फले प्राधान्यादेकानेकस्मै
नुष्ठानाभावात् ने च दक्षिणान्यूनाधिकयाप्रयोगेन द्वादशवार्षिकषड्वार्षिकत्रैवा
र्षिकार्हे प्रसादात्कर्षं दक्षिणाव्यवस्थापनीया ॥ ४२ ॥ अरण्ये नियतो जप्त्वा त्रिर्वै दस्य च सं
हितां शुद्ध्यते वा मिताशनः प्रतिस्रोतः सरस्वतीं ॥ ४३ ॥ किंच अरण्ये निर्जनप्रदेशे नि

१०५

प

ग्रेपानि ब्रह्मघ्निमातापितृशिरश्छिरन्तव्यानस्येति अनशनस्यानुशनकर्शितकलेवरस्याप
थे: तथा च काठकश्रुतिः अनशनेन कर्शितो ग्निमारुह्य दिनद्वये च मरणान्तिकं प्राय
श्चित्तं कामकारविषयं तथाह मेधातिथिः प्राणान्तिकं च यत्प्रोक्तं प्रायश्चित्तं मनी
षिभिः तत्कामकारविषयं विज्ञेयं नात्र संशयः तथा यः कामतो महापापं नरः कुर्या
त् कथंचन न तस्य शुद्धिर्निर्दिष्टा भृग्वग्न्यनशनादृते इति एतच्च प्रायश्चित्तं स्वतन्त्रमेव
न ब्राह्मणत्राणादिवद्द्वादशवार्षिकान्तर्भूतमित्युक्तं प्राक् ४१ संग्रामे वा हतो लक्ष्य
भूतः शुद्धिमवाप्नुयात् मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यति ४२ किंच अश्व
वा संग्रामे पृष्ठमाधुभयबलप्रेरितशरसंपातस्थाने लक्ष्यभूतो मृतः शुद्धिमाप्नुया
त् गाढमर्मप्रहारजनिततीव्रवेदनो मृतकल्पो मूर्च्छितो जीवन्नपि विशुध्यति लक्ष्यभा
वश्चैतत्प्रायश्चित्तान्तर्यमित्येवं विदुषा धनुर्विद्याविदा संग्रामे स्वेच्छया कर्त्तव्यो न पुनः राज्ञा
बलात्कारयितव्यः यथाह मनुः लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मन इति
द्वयं च मरणान्तिकत्वात् तात्कालिकं तद्विषयं कामकारविषयं प्रायश्चित्तद्वयं मेधादि

- 205

द्दर्भैः सपवैरोपासनिकस्येति गृह्यकारवचनात् तथाहृतान्सर्वस्वं सपरिच्छदं गृहं वा दद्यात्
यथाह मनुः सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् धनं वा जीवनायालं गृहं वा सपरि
च्छदमिति इदं च पाञ्चधनदानं समृतस्य धनवतो हेतुनिर्गुणब्राह्मणपादने द्रष्टव्यं तत्रैव वि
षयेः विद्यमानान्वयस्य सर्वस्वदानं सान्वयस्य तु सोपस्करगृहदानमिति व्यवस्था प्रदर्शि
यताप्रहरेणाङ्के चान्तर्विंशोपपत्नेतविधिवद्गतस्याग्निके समग्रस्येन गमने प्राप्यश्चित्तं विधि
निर्दिष्टेन सेतुबन्धपथे भिक्षाचान्तर्वर्णो समाहरेत् वर्जयिता विकर्मस्थानब्रह्मघ्नोपा
नह्रिवर्जितः अहेतुः कृतकर्मा च महापातककारकः गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्र
ह्महातकः गोकुलेषु च वा गोष्ठे ग्रामेषु नगरेषु च तथा वनेषु तीर्थेषु नदीप्रस्रवणेषु च
एतेषु ख्यापनं कार्यं श्रुत्वा च सागरं ब्रह्महा विश्वसप्तेन तस्मिन्स्नात्वा महोदधौ ततः
पूतो गृहं प्राप्य कृत्वा ब्राह्मणभोजनं दत्त्वा च गां पवित्राणि हुत्वा तान्साग्रविशेषः गृहे गवा
चापि शतं दद्यात्स्नातविद्यापरदक्षिणां एवं शुद्धिमवाप्नोति चान्तर्वियातुमोदितं इति त
दपि पादेऽधने वापयोगमितानेन समानविषयं यज्ञस्य मन्तव्यं वचनं ब्रह्महा शवस्य शक्तश्चा

यतोनियताहारः जपेद्वानियताहार इतिमनुस्मरणात् द्वितीयेमंत्रब्राह्मणात्मकेवेदेज
पितागृह्णाति संहिताग्रहणंपदक्रमयोःदासार्थं यद्वाभिताशनेभ्यःताज्ञत्वपस्त्वे
णाद्वारभ्यापस्त्रिमादध्येःइतिस्रोतःस्रोतःइतिसरस्वतीमितागवागृह्णाति स्वशन्
ह्रविष्णोकापेहविष्णुभ्रुक्ताब्रवेत्सुतिस्रोतःसरस्वतीमितिमनुस्मरणात् अथ
चवेदजपोविद्दुषोहंनिंर्धनस्यात्वेनगुणवतोनिर्गुणत्वापादनेश्रमाद्धोनेद्दृष्टपः
सरस्वतीगमनेनताहृशणवविषयेविद्याविद्वहिणोदृष्ट्वं निमित्तिनस्य तिरस्कृतोय
दाविशानिर्गुणोनिमित्तयनेपटोतिसमेतवचनेस्पष्टीभीतत्वात् यत्तुनमेऽत्ववचनेजपेवा
न्यानंमवेदेयोजनानाशनंत्रजेत् नदृष्यारण्येपनियतोजस्त्रंतस्यैवविषयेणऽ्कस्य हृष्टवा
५३ याजेथनेवायर्याप्तेदत्तानगुह्निमवाप्नुयात् श्यादानस्य विश्रद्धार्थमिति वैश्वानरीं चरे
त् ५४ किंच नविद्यया केवलयेत्याघत्के लब्धोणपाद्येगोभ्यःहिरण्यादिके जीवनायप
यात्नेममर्थंदत्तानगुह्निमवाप्नुयात् नष्टन्यः इतिगृह्णाति नस्यवैश्वानरदेवतेष्टिःसु
ड्डार्थे कर्तव्या यतदाहितानोग्निविषयं यत्नाहितानेसहेवताःचरुभवति यपवाहितानो

मि. द.
प्रा.
१२

206

मानगतेन गुणविशेषेण प्रायश्चित्तविशेषो व्यवस्थितः स एव तत्तु गुणविशिष्टेष्वपि त्रिषु
द्रौहेन्तरि द्विगुणं त्रिगुणं वेदितव्यः अत एव दिशान्तरे त्रिपदैश्यादावपि हीने नोक्तः एवं वै
द्रोषगौरवात्प्रायश्चित्तस्यापि द्वैगुण्यादि कल्पनीयं दोषगौरवं च वर्द्धगौरवादवगम्यते
यथोक्तं प्रतिलोमापवादेषु द्विगुणं त्रिगुणं तथा । वर्णानामानुलोम्येन तस्मादर्द्धार्द्ध
हानितः इति एतच्च तत्र विंशतिमतवचने प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः पादो
नं क्षत्रियः कुर्यादर्द्धं वैश्यः समाचरेत् शूद्रः समाचरेत्पादमशेषेष्वपि पापेष्विति तस्मा
त्प्रतिलोम्यात्प्रायश्चित्तं च तद्विंशत्यहसंव्यतिरिक्तविषये तथा मूर्द्धावसिक्तादीनामप्यनुलोमा
नामानां दण्डवत्प्रायश्चित्तमूहनीयं दर्शितं च दण्डतारतम्यं दण्डप्रणयने कार्यं वर्णज्ञात्या
नतराधरैरिति तत्र मूर्द्धावसिक्तस्य ब्राह्मणवधे ब्राह्मणवदिति विकल्पत्रिपादन्यूनमर्धा
र्द्धं द्वादशवार्षिकं भवति अत एव दिशा प्रतिलोमानामपि प्रायश्चित्तगौरवमू
हनीयं तथाश्रमिणामप्याश्रमविशेषेणोक्तः गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमि
णो यदि शौचवच्छोधनं कुर्युरन्यग्रब्रह्मनिष्ठानां दिनि शौचवदिति एतच्छौचं गृह

१०

शूद्रेत्। अधःशायी त्रिषवणी कर्मावेदको भैक्षाहारो नदीपुलिनसंगमाश्रमगोष्ठ
पर्वतप्रस्रवणतपोवनविहारी स्यात्। स्थानवीरासनी सवनस्नायी पूर्णे हि २ एवमाणि रोग
धान्यतिलसर्षपपर्णापि प्राह्लाभो दृश्यास्त्रेता भवतीति। न त्वपि हेतुश्च देवस्य धनव
तो ज्ञातिमात्रव्यापादने द्रष्टव्यं। यत्तु नवेस्मिष्ठवचनं द्वादशराज्ञमेव भेदो द्वादशरा
त्रमपव शेदिति तन्मन नसाध्यावसित ब्रह्महननस्य स्वतपवोपरत जिघांसस्य वेदितव्यं प
स्नुनः षडेतत्रास्माणे हनाश्च द्रव्यस्माव्रतं चरेत्। चान्द्रायणं वा कुर्वीत पाराकद्वयमेव वेति
षट्त्रिंशन्मतवचनं तद्ब्रन्यानेयं पुस्तुरस्य शत्याचव धे द्रष्टव्यं। एतदेव विषये शय्यपव
धेहह स्मृतिराह। अस्पसल्याः सरस्वत्याः संगमे लोकविश्रुते। शुद्धो त्रिषवणस्नायी त्रि
रात्रोपोषितो द्विज इति। एवमन्यान्यपि स्मृतिवचनानि अन्विष्य विषयाणि व्यवस्थापि
ज्ञेयाः समानानां तु विकल्पः। एतानि च द्वादशवार्षिकादीनि दानपर्यन्तानि ब्राह्म
णस्यैव हन्तरि पादे तु द्विगुणादिकं। यथाह अङ्गिराः। षड्वर्षाणि ब्राह्मणं च स राज्ञो द्विगुण
मता वैश्यानां त्रिगुणा प्राकाराषड्वर्षाणि व्रतस्थानमिति एवं ब्राह्मणनाये जहंस्तर हस्य

मि॰ ता॰
प्रा॰
१८

207

वचनस्तथाप्यत्र सोमयागमभिसंधत्ते सवनगतौ राजन्यवैश्याविति वसिष्ठेन सवनगतय
मे पाद्यस्य सोमयागस्यैव निर्दिष्टत्वात् अत्र च गुरुलघुभूतानां द्वादशवार्षिकादिव्रतस्मह
त्यानां व्रतानां जातिशक्तिगुणाद्यपेक्षया व्यवस्था वेदितव्या एवं गर्भवधादि
ष्वपि मरणान्तिकेन नातिदिश्यते व्रतग्रहणेन अतः कामतो यागस्थक्षत्रियादिवधे
व्रतस्यैव द्वैगुण्यं एतद्व्रतं संपूर्णमेव कर्त्तव्यं एवं पार्वणं योर्वेदाध्यायिनं हत्वेति प्रक्रम्या
पस्तवेन द्वादशवार्षिकाभिधानात् गर्भे च पित्रा सह संभृते हत्वा यथावर्णं यद्वर्णं पुरुषव
धे प्रायश्चित्तं तत्तद्वर्णगर्भवधेन तु रेतः एतस्त्वानुपजातस्त्रीपुंनपुंसकव्यंजने गर्भविषये
हत्वा गर्भमविज्ञातमिति मानवे विशेषोक्तः अत्र च यद्यपि ब्राह्मणगर्भस्य ब्राह्मणत्वादे
वतद्वधनिमित्तव्रतप्राप्तिस्तथापि स्त्रीत्वस्यापि संभवात् स्त्रीशूद्रविट्क्षत्रवधस्तूपपात
कं तेन तत्प्रायश्चित्तप्राप्तिरपि स्यात् अतः स्त्रीपुंनपुंसकत्वेनाविज्ञातेऽपि ब्राह्मणगर्भ
वधमात्रे फले ब्रह्महत्याव्रतं कुर्यादित्यर्थवदतिदेशवचनं उपजातेषु स्त्रीपुंसादिविशे
षव्यंजने यथायथमेव प्रायश्चित्तं पञ्चात्रेय्यामितिहस्तको दयापादपितासोपितयाव्रते

१८

स्यानां द्विगुणं ब्रह्मचारिणां त्रिगुणं स्याद्वनस्थानां यतीनां च चतुर्गुणमिति वचनाद्य
था ब्रह्मचर्यादीनां शौचे द्वैगुण्यादिक्रमेण वर्द्धते तथाशौधन प्रायश्चित्तमपि भवतीत्य
र्थः ब्रह्मचारिणस्तु प्रायश्चित्तद्वैगुण्यं षोडशवर्षादूर्द्धमेव अर्वाक् पुनः बालो वा ऊनषो
डशः प्रायश्चित्तार्द्धमर्हतीति षोडशवर्षादर्वाचीनस्यार्द्धप्रायश्चित्ताभिधानात् न च द्वाद
शवार्षिके चतुर्गुणे त्रिकपमालेमध्ये विपत्तिशंकया समाप्त्यनुपपत्तेः अद्भिरेवेनोपपद्य
त इति शंकनीयं यतः अकृतप्रायश्चित्तस्य मध्ये विपन्नावपि पापपूतो भवत्येव यथाह
हारीतः प्रायश्चित्ते व्यवसितः कर्त्ता यदि विपद्यते पूतस्तदहरेवासाविहलोके परत्र चेति
व्यासोप्याह धर्मार्थं यतमानस्तु न चेच्छक्नोति मानवः प्राप्नो भवति तत्पुण्यमत्र मे नास्ति
संशयः ४४ यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणि व्रतं गर्भहा च यथावर्णं तथात्रेयी
निषूदकः ४५ अथ नानिमित्तान्तरेषु ब्रह्महत्याप्रायश्चित्तस्यातिदेशमाह दीक्षणी
यादुदवसानीयापर्यन्तसोमयागप्रयोगे वर्तमानौ क्षत्रियवैश्यौ यो व्यापादयति असौ
ब्रह्महणि उक्तपूर्वं द्वादशवार्षिकादि तच्चरेत् यद्यपि यागस्थः सामान्य

मि॰ ता॰
प्र॰
१०५

निषेधेनुपादेयगतत्वेन लिंगवचनयोरविवक्षितत्वात् ब्राह्मणजातेः स्त्रीपुंसयोरविशे
षादतोऽत्र मतिमित्तप्रायश्चित्तविधेर्ब्रह्महा द्वादशाब्दानीत्यस्योभयत्रापि प्रवृत्तत्वात् किम
र्थं तर्हि आत्रेयीनिमित्तकस्यातिदेशवचनं उच्यते सत्यपि ब्राह्मणत्वेनात्रेय्या वधे महा
पातकप्रायश्चित्तनिराकरणार्थं अतस्तस्योपपातकप्रायश्चित्तमेव अतिदेशकेषु च
प्रायश्चित्तस्यैवातिदेशो न पातित्यस्य अतः पतितत्यागादिकार्यं मतं न भवति ॥ ५५ ॥ चरे
द्व्रतमहत्वापि घातार्थं चेत्समागतः । द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत् ॥ ५६ ॥
किं च यथावर्णमित्यनुवर्तते ब्राह्मणादिहननेच्छया निष्प्रयत्नस्यापादनार्थं सम्यगा
गतश्शस्त्रादिप्रहारेच्छुर्न कथंचित्सन्निपातादिप्रतिबंधवशात् सोऽनेन न हतस्तदाऽहत्वापि
यथावर्णं ब्रह्महत्यादिव्रतं चरेत् तथाच गौतमः । स्पृष्टश्च ब्राह्मणवधेऽहत्वापीति न
तु हननेनेत्यभावे चैकप्रायश्चित्तत्वानुयुक्ता सत्यं अतएवोपदेशकेभ्योऽन्यूनत्वादतिदे
शकाले यदा नान्यव ब्रह्महत्याव्रतानि द्वादशवार्षिकादीनि भवंति एतच्च प्रपंचितं
प्राक् किंच यस्तु सवनस्थं यागे सोमयागमनुतिष्ठंतं ब्राह्मणं व्यापादयति तस्मिन् द्वि

१०५

208
208

चरेत्। हन्यमानात्रेयीवर्णां गुरुं तं व्रतं चरेदित्यर्थः। आत्रेयीशब्देन ऋतुमत्युच्यते रजस्वला
ऋतुस्नातामात्रेयीमाहुरत्र ह्येष्यदपत्यं भवतीति वसिष्ठस्मरणात्। अत्रिगोत्रजां वा अत्रि
गोत्रजां वा नारीमिति विष्णुस्मरणात्। एतदुक्तं भवति ब्राह्मणगर्भवधे ब्राह्मण्यात्रेयीवधे च
ब्रह्महत्याव्रतं क्षत्रियगर्भवधे क्षत्रियात्रेयीवधे क्षत्रियहत्याव्रतं एवमन्यत्रापीति चशब्दा
त्समाद्यपन्नतवचनादिष्टमपि यथाह मनुः। उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा। अ
पहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधमिति। अत्र व्यवहारे साक्ष्यवचने वर्णिनां वधप्राप्ति
स्तद्विषयमेतत् प्रायश्चित्तं स्यात् गुरुत्वात्। प्रतिरोधः क्रोधावेशः। निक्षेपश्च ब्राह्मण
संबन्धी स्त्री चाहिताग्नेर्भार्या पतिव्रतत्वादिगुणफलकोच्यते सवनस्था च। यथाहांगि
राः। आहिताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिन्दिताम्। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव
चेति। सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेदिति यमस्मरणात्। एवं च सवनस्था
स्त्रिया क्षत्रियात्रेयीवधे ब्रह्महत्याप्रायश्चित्तातिदेशतत्स्यादिति। स्त्रीवधस्य स्त्रीशूद्र
विट्क्षत्रवधस्तूपपातकेमध्यपाठादुपपातकत्वमेव न च ब्राह्मणेन हन्तव्याऽन्यत्र

सि. त.
टी.
११

109

पातेकामकृतेजलेतौतौविनिक्षिपेत् मृतवित्तपाविनिर्दृग्योऽम्बतः शुद्धिमवाप्नुयादिति
बृहस्पतिस्मरणात् यत्तुसुरांपीत्वाद्विजोमाहात्म्यादग्निवर्णांसुरांपिबेदितिमनुनामोह
गृहणेकृतेनतत्त्वास्वार्थापरिज्ञानाभिप्रायेण अवदेविविच्यते किंतत्सुराशब्दोमद्य
मात्रेरूढउतपैष्ट्यांगौडीमाध्वीपैष्टीष्वाहोस्वित्पैष्ट्यामेवेति अत्रकेचिन्मद्यमा
त्रेरूढइतिवर्णयंति अभ्यासेनतत्सुरापानंइतिवासिष्ठेपैष्ट्यादित्रयमतिरिक्तेपिमद्यमात्रे
सुराशब्दप्रयोगदर्शनात् नचासौगौणः प्रयोगइतिशंकनीयं मदजननशक्तिमत्त्वो
पाधिकतयासर्वत्रमुख्यत्वोपपत्तौगौणत्वकल्पनायायुक्तत्वादिति तदुक्तं पान
सं १ द्राक्षं २ माधूकं ३ खार्जूरं ४ तालं ५ मैक्षवं ६ मधूकं ७ सैरं ८ माक्षिकं ९ मैरेयं १०
नारिकेलजं ११ समानानिविजानीयान्मद्यान्येकादशैवतु द्वादशंतुसुरामद्यंसर्वेषाम
धमंस्मृतमिति पुलस्त्येनमद्यविशेषत्वेनसुरायानिर्दिष्टत्वात् अतस्सुमद्यमात्रेषुसुरा
शब्दप्रयोगोगौणः अन्येषुतुपैष्ट्यादिषुतिसृषुसुराशब्दस्यरूढत्वंमन्यन्ते तथाहि
यद्यप्यनेकत्रसुराशब्दप्रयोगोदृश्यते तथापितज्ज्ञानादित्वामितिसंदेहेगौडी २ मा

११

गुणं द्वादशवार्षिकादिव्रतं समादिशेत् तेषां च व्रतानां गुरुलघुभूतानां जातिशक्तिगु
णाद्यपेक्षया सत्यपि सवनस्थत्वाविशेषे पूर्ववेदव्रतावस्थावगतं वा ब्रह्महत्यासमा
नानुगुणं विधितेपाटीनामातिदेशिकेष्वपि न्यूनतादृष्टेन द्वादशवार्षिकादिप्रायश्चि
त्तमूह्यं इति ब्रह्महत्याप्रायश्चित्तप्रकरणं सुरांबुघृतगोमूत्रपयसामग्निसंनिभं सुरा
पोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति १ अथ क्रमप्राप्तं सुरापानप्रायश्चित्तं प्रक्रमते
सुरादीनामन्यतममग्निसंनिभं क्वाथ्यापादिताग्निस्पर्शदाहशक्तिकं कृत्वा पीत्वा
सुरापो मरणात् शुद्धिं प्राप्नोति गोमूत्रसाहचर्याद्गव्ये एव घृतपयसी ग्राह्ये घृतपयः
साहचर्याच्च गौणमेव गोमूत्रं एतच्चाकृत्वासमाकार्यं सुरापः स्याद्द्वेवासस्त्राग्निवर्णां सु
रां पिबेदिति श्रवणात् स्मरणात् तथा लोहितपात्रेण सुरापोऽग्निवर्णांमायसेन पात्रेण
तां तेन वा पिबेदिति श्रवणात् स्मरणात् एतच्च सकृत्पानमात्रे सुरापाने सकृत्कृत्वाप्य
ग्निवर्णां सुरां पिबेदिति गिरः स्मरणात् एतद्वसिष्ठवचने अभ्यासेन तु सुरापास्त्वग्नि
वर्णां तां पिबेद्द्विज इति तत्सुराव्यतिरिक्तमद्यपानविषयं एतच्चाकामकारविषयं सुरा

त्रिकनिष्ठागणेति न तच्छफलं पुंसोऽनेन दृष्टास्त्वे पापादृष्टानुगमनवक्तुष्ठार्थमेवेष्यमाणा
दित्वश्रुतिपाठनपरं किंतु काण्वश्रुतिपाठनपरं गतो गृह्याणापस्थितेतिमितनपा
गौडीमाध्वीपैष्टीगौणाः सुराशब्दप्रयोगः एवं च नानेकशक्तिकल्पनादोषो नापद्य
पाध्यापुंश्चपाणः कृतः नाचातेऽद्विजोत्तमेत्यत्र सत्योपलक्षणत्वेनयततसुरावैमल
मन्नानां पाप्मा वै मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति पै
ष्ट्या एव वर्णत्रयं प्रत्येवं धिनेन निषेधः गौड्यादीनां ब्राह्मणं प्रत्येवं धिनेनैव निषेधो न
त्रिवैश्ययोः यतश्च पिशाचान्नं मद्यं मांसं सुरासवं तद्ब्राह्मणेन नात्तव्यं दे
वानामश्नता हविरिति मानवे ब्राह्मणेनेति विशेषोपादानात् बृहद्विष्णुनापि ब्रा
ह्मणस्यैव मद्यनिषेधो दर्शितः माधूक १ मैक्षव २ मैर ३ ताल ४ खार्जूर ५ पानस
६ मधूत्थं ७ चैव माध्वीकं ८ मैरेयं ९ नारिकेलजं १० अमेध्यानि दशैतानि मद्यानि ब्रा
ह्मणस्यैवेति बृहद्याज्ञवल्क्येनापि क्षत्रियवैश्ययोर्दोषाभावो दर्शितः कामादपि हि
राजन्यो वैश्यश्चापि कथंचन मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते इति व्यासेनापि तयो

ध्वीच २ पैष्टीच ३ विज्ञेया त्रिविधा सुरेति मनुवचनाद्गुडमधुपिष्टविकारेष्वनादि
त्वान्निर्द्धारणान्नैवमप्यन्यतरपक्षे नचानेकत्वशक्तिकल्पनादोषः मद्यशक्तेरुपाधि
त्वाश्रयणेन तस्य परिहरणात् नचनालादिरसेष्वप्युपाधेर्विद्यमानत्वादतिप्रस
ङ्गः एकजातिशब्दवैधाग्रहणादाश्रयणमानात् अतएव पैष्ट्येवैका तथा सर्वानपान
व्याद्विजोत्तमैरिति निरस्तं सुराणां समानदोषत्वप्रतिपादनपरं नतु नरतनयो
गौडीमाध्व्योः पैष्टीसुरासमत्वप्रतिपादनपरे द्विजोत्तमग्रहणे द्विजान्तूपलक्षणं
परत्वप्रयुक्ते हारदत्तेन सुरामद्यं सर्वेषामधमेस्यन्तमिति पुलस्त्यवचने गौडीमा
ध्वीभ्यामपि सुरामद्यस्य व्यतिरेकदर्शनात् तथाहि सुरा वै मलमन्नानां पाप्मा च
मलमुच्यते इत्यन्नविकारस्यैव सुरात्वनिर्देशात् अत्रान्नशब्दस्य चात्र नवीजननमि
त्यादिवद्व्रीह्यादिविकारएव प्रयोगदर्शनात् गुडमधुनोरन्नरसरूपत्वात् तथा सौ
त्रामण्यां ग्रहेषु चान्नविकारएव सुराशब्दस्य प्रयोगः तथाहि पैष्ट्येव सुरा मुख्योच्यते इ
तरे यास्तु सुराशब्दा गौणाः अतएव गौडी पैष्टी माध्वीति मनुवचनात्रिस्रष्यानं

नब्राह्मणेननानवंदेवानामस्मत्ताहविरितिमद्यस्यापिजातिमात्रावच्छेदेननिषिद्धत्वा
त् शुद्रानुपनीतेननेतेयं ननुकथमनुपनीतस्य दोषः प्रागुपनयनात्कामाचारकामवा
दकामभक्ष इतिगौतमवचनात् तथानमद्यस्यैवशेषाणांभक्षणेनास्तिकश्चन
दोषस्तुपंचमाद्वर्षात् हिपित्राः स्वद्रुहोरितिकुमारवचनात्तदोषाभावावगतेः उच्यतेम
द्यमद्यपाननिषेधवाक्येजातिमात्रस्यावच्छेदकत्वश्रवणाद्श्रुतिहन्तैवनिषेधश्रुतेः अत
एवस्मृत्यंतरेनिषेधवचनंसुरापाणनिषेधस्तुजात्याश्रयइतिविज्ञानेश्वरमुक्तः पाठोवा
लेष्वदातव्यः सर्वपुंपसुपंविधिरितिसर्वपापेषुसुरापानादिषुपीतिवचनात्पाटएवसु
रापाणप्रायश्चित्तं ज्ञानकर्तृपनचमद्यपानेप्रायश्चित्तमुक्तं अनुपेतस्तुयोवालोमद्यमा
हात्यिवेद्यदि तस्याकृच्छ्रत्रयंकुर्यान्मातातभ्रातातथापितेति अतोगौतमवचनेसुरापीत
ब्रिन्नशुक्रपर्युषितादिविषयंकुमारवचनंतु स्वल्पदोषव्यापनपरं अतएवप्रागुपनयना
त्कृतेदोषस्योपनयनमेवप्रायश्चित्तमित्युक्तमत्रुना गर्भैर्होमैर्जातकर्मचूडामौंजीनिवं
धनैः वैजिकंगार्भिकंचैनोद्विजानामपमृज्यतइति मद्यमात्रार्थैद्वैवार्णिकानामुत्पन्नित्रै१२

मांद्यीपानमज्ञानतउभौमद्याप्सवातीवाहेष्टोमेकेणवाजुंनाविति एवंब्राह्मणस्यैवंधी
तेनमद्यमात्रनिषेधेसत्यपिगौडीमाध्वीचपैष्टीचविज्ञेयात्रिविधासुरा यथैवैकातथास
र्वानपातव्याद्विजोत्तमैरिति गौडीमाध्व्यो:एतयोः निषेधवचनेदोषगुरुत्वेनसुरासमत्वश
निपातनपरमयंसुरानिषेधोनुपनीतस्यान्स्टापाश्रुकन्यायानस्माद्ब्राह्मणराजन्यौवै
श्यश्चनसुरांपिबेदिति जातिमात्रावच्छेदेननिषेधात अतश्चसुरांपीत्वाद्विजोमोहादि
तिप्रायश्चित्तविधिवाक्येमनुनापनद्विजग्रहणंकृ तेनतुल्यं त्रपोपलक्षणार्थं निमित्तस्य
तनिषेधसापेक्षत्वान्नैमित्तवा निषेधेवर्णमात्रस्यावच्छेदकत्वात यथायस्यहविर्नि
तिरेपुरस्ताच्चेदमावास्याभ्युदेतीतिनिमित्तवाक्येहविर्मात्रस्यपुरोडाशस्यनिमित्ततावगतेतात
त्सापेक्षनैमित्तिकवाक्येप्युपमाणमपित्रेधातन्डुलान्विभजेदितितन्डुलग्रहणंतन्डुलसाद्र
पहविर्मात्रोपलक्षणं इत्यापस्तंबविशेष:पाटोवालेश्चद्वातव्यासर्वपापेषुपंचविधिरितिव
चनात्कामकारेपिनमरणांतिकं किंतुपादमेवद्विगुणंकृत्यषड्वार्षिकंदेयं विहितेप
टकामानांकामातद्विगुणंचरेदितित्रिगिरसः स्मरणात एवंहस्तोनराद्दक्षांस्पोजस्तथा

वहुतयेत् सप्तत्वसकृदेव कार्यं कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशीति मनु
स्मरणात् अब्दपिण्याकादिभक्षणस्य भोजनकार्ये विहितत्वात् तदभावेन तद्रव्यत्यागः
एतच्चाटकवुद्ध्या सुरापाने कृच्छ्रे देनोन्तरकाले वेदितव्यं एतदेव ज्ञानकृ पांसुरापक्षे देने
कृते पंचगव्यं तस्योक्तं शत्वहकापशोधनमिति व्यासवचनात् नचसुरासेटकेपद
पलभ्यमानेन तदुपरसेटकपानविषयमिदमिति सेटरं संसर्गेपि सुरातस्यानपापात्
पथ्याज्यलस्पष्टषष्टाज्ये ग्रतएवाजपाइतिनिगमाकांयांन पष्टषष्टाज्यपाइत्येवमुक्तत्वा
दविद्भिः पतनरापस्तंववचने लेपकृतानासुरापीतागुरुदारगत्वान्नाव्रह्महत्यांचकृ
त्वाचतत्थं कालमितभोजनो यायभुपेयात्सवनानुकल्पंस्थानासनाभ्यांविहरंस्त्रिभि
र्वर्षैःपापंव्यपनुदतीति यज्ञागिरावचने महापातकसंयुक्तावर्षैस्त्रिभिर्विशुद्ध्यतीति
तदुभयमपिपिण्याकेवाकणान्नित्यनेनैकविषयं पदपियमेनज्ञायमित्रदयमुक्ते ह
हस्पतिसवेनेष्ट्वासुरापोव्राह्मणःपुनःसमभेव्राह्मणैर्गच्छेदितियावेदिकोश्रुतिः
ग्रमिष्टानेपकुर्यान्सुरापीताद्विजोत्तमःपुनर्वचपिवेत्रीनसेस्कृतःसविशुद्ध्यतीतिन

त्रिपैष्टीनिषेधः ब्राह्मणस्यतु मद्यमात्रप्रतिषेधोप्युत्पत्तिप्रभृत्येव राजन्यवैश्ययोस्तु
न कदाचिदपि गौड्यादिमद्यप्रतिषेधः शूद्रस्यतु न सुराप्रतिषेधो नापि मद्यस्य प्रतिषे
धः १ बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत् पिण्याकं वा कणान्वापि भक्षयेत्स
मा निशि २ अपरिज्ञानेऽप्याह गोच्छागादिलोमनिर्मितवस्त्रप्रावृतः बालवासोऽथह
णचीवरव[illegible]ल्कलेपारूपलतर्णर्थं सुरापः कृतलम्पगोचीरवल्कलवाससौब्रह्म
हत्याव्रतं चरेत् पानाभिनिवेशेन स्मरणात् जटीग्रहणं स्मश्रुत्वनिराकरणार्थं ब्रह्मह
त्याव्रतं चरेदित्यनेनैव सिद्धे पुनर्बालवसनादिग्रहणं तद्ध्वजासंभवात्खपुंसाविन
शिरः कपालादिनिवृत्त्यर्थं इदमकामतो जलबुद्ध्यापः सुरांपिबन्नहिषपर्यंविशुद्धि
रदिताश्रमाप्याकामतो द्विजोमतिकामोपापाधते न विहितमेव द्वादशवार्षिकस्या
तिदेशात् अत्र च सुरापानस्य महापातकत्वात्तस्य प्रातिदेशिकत्वे सम्पूर्णमेव द्वाद
शवार्षिकं रूपीत्रपादोनं अतएव बृहद्धारीतः द्वादशभिर्वर्षैर्महापातकिनः पूय
न्त इति अथवा पिण्याकं पिण्डीतेसमावर्षत्रयं रात्रौ भक्षयेत् कणान्कुण्डलवासनाशुद्धवं

गेपतितैर्गन्ता द्विजश्चान्द्रायणं चरेत् यत्तु पिताहं स्मृतं गौडी माध्वी सुरा पैष्टी चोक्ता त्रिविधः स
माचरेत् तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात् तत्त्रितयमप्यन्नौषधस्यायथाव्याध्यु
पयोगार्थं पाने वेदितव्यं प्रायश्चित्तस्याल्पत्वात् यदा तु सुरासंस्पृष्टं शुष्कं रसमेवान्न
श्नत्यपि तदा पुनरुपनयनं यथाह मनुः अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव
च पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातय इति यदा तु शुष्कं सुराभाण्डोदकं पिबति त
दा शातातपोक्तं कुर्यात् सुराभाण्डोदकप्राशने कृच्छ्रेण शुद्धप्राशने महोरात्रोपवास
श्चेति यत्तु बौधायनीये सुरापाणस्य पात्रभाण्डे ग्रन्थपर्युषितं पिबेत् शंखपुष्पीविपक्वं
तत्क्षीरं सप्त पिबेदहमिति तत्पर्युषितत्वाधिके अकामतोभ्यासे पुनर्मन्त्रेणाक्ते अ
पः सुराभाजनस्था मद्यभाण्डस्थितास्तथा पञ्चरात्रं पिबेत्पीत्वा शंखपुष्पीशृतं पयः इति
यत्तु विस्मृतं अपः सुराभाजनस्थाः पीत्वा सप्तरात्रं शंखपुष्पीशृतं पयः पिबेदिति तन्म
तिपूर्वके पाने ज्ञानतोभ्यासे तु हृदयमप्याह सुराभाण्डस्थितं तोयं यदि कश्चित्पिबेद्द्विजः
सप्ताहं क्षीरेण पिबेद्ब्राह्मीं सुवर्चलामिति सुरादिस्पृष्टवगन्धघ्राणेन मानवे ब्रा

दुभयमपि पूर्वेण सहैकविषयं पद्यातेति विरुद्धं इति एण कन्याश्रयणा द्वादशवार्षिकेन सह
विकल्पनेऽत्रापि बालहत्यादीनां सार्द्धैकवार्षिकमत्र यदीतानां नवमासिककल्प
नाकार्पी यत्तु मनुवचनं कृतान्नादत्तपेटहंपि एवाके वासहक्षिशि सुरापानानुपत्र
न्यर्थं बालवासाज्जटीधृजीति नत्रालमात्रसंयोगे सुरापायवुद्धिः एवं के दृश्चपानत्रु
वद्धव्यस्याभ्यवहरणपानमित्युच्यते अभ्यवहरणं चकेवाद्धोनयनेन तालादिसंयो
गमात्रमतः कथं नत्र पाननिमित्तं प्रायश्चित्तमुच्यते येन तालादिसंयोगेन विनापान
क्रियानिर्वर्त्तते सोपि पानं किं प्रतिषेधेन प्रतिषिद्धः एतेन यद्यपि सुरायाः पानाभा
वात्रमहापातकत्वं तथापि तत्प्रतिषेधेन तदंगभूतानाव्यभिचारेपि तालादिसंयोग
स्यापि प्रतिषेधात्तेन दोषस्य विद्यमानत्वात् तत्वप्रायश्चित्तं चरेदुक्तं महत्त्वापि घाता
र्थं चेत्समागतइति यथा हननप्रतिषेधेन तदंगभूतनाधावसायादेरपि प्रतिषिद्धत्वा
त्प्रायश्चित्तविधाने यत्तु वोढायतीत्रैमासिकममत्या सुरापाणे कृच्छ्राब्दपादं चरि
त्वा पुनरुपनयनमिति यत्तु याज्ञ सुरापीता द्विजं हत्वा रुक्मं हत्वा द्विजन्मनः संयो

मि· ता·
२·
११५

११४

रोमश्मश्रुशिखावर्जं वपनं दैवसांतापनेनेति यदप्यस्मिन्नेव विषये मनुनोक्तं अज्ञानात्प्राश्य
णं पीत्वा संस्कारेणैव शुध्यतीति तदप्यमतिपूर्वकमेवं गौतमवाक्यानुरोधात्
पुनःसंस्कारश्च पुनरुपनयनं तत्राप्तुलापनादिकं कर्मैकतन्त्रं यथोक्तं यथा
पेत एवं स्मृत्यन्तरे कृत्स्नं वपनं मेधाजिने चानि कृत्वा परिष्टानकालस्तु तन्त्रावितत्वे
रणे यमः इति सावित्रीमिति मतिरेवं मद्यपाने वसिष्ठेनोक्तं ऽमत्या मद्यपा
ने सुरापानः सुरापाथ्याज्ञाने कृच्छ्रातिकृच्छ्रौ घृतप्राशः पुनःसंस्कारश्चेति वोद्धाय
णेनाप्युक्तं अमत्या मद्यपाने पयो घृतं चोदकं वायुं प्रतित्र्यहं तप्तानि स कृच्छ्रो ऽनन्तरं मौञ्जीति व
द्धाः प्रभत्याणामपि पाणमले भ्यानाच भवतीणे रेतोमूत्रपुरीषाणां प्राशने तु क
थं भवेत् पद्मोदुम्बरबिल्वानां पलाशस्य कुशस्य च एतेषामुदके पीत्वा षड्रात्रेणैव
शुध्यतीति एतच्च तालादिमद्यविषयं गौडीमाध्वीः पुनर्ज्ञानतः पाने सुरापायश्चा
ज्ञानतः इति वसिष्ठेनोक्तं द्रष्टव्यं कृच्छ्रातिकृच्छ्रमहितः पुनःसंस्कारो घृतप्राशश्च
द्रष्टव्यः तेषामेतत्रैव पाने तपःप्रणाकं वा कर्तव्यमिति त्रैवार्षिकं कामतस्तु तस्या

११५

ब्राह्मणस्य सुरापस्य गंधमाघ्राय सोमपः प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुद्ध्यतीति त
त्सोमपाजिन एवमतिरेवं न द्विगुणं यःपीतसोमस्य तत्र केवलस्य साक्षात्सुरागंधघ्रा
णस्य तु त्र्यहमग्निरुद्धेपमद्यपायीति जातिभ्रंशकरं वा जातिभ्रंशकरं कर्म कृत्वान्यत
मभिसंध्या चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति मनुस्मरणं द्रष्टव्यं २ अज्ञाना
च सुरां पीत्वा रेतो विण्मूत्रमेव च पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः ३ प
देशं त्वज्ञात्वा सुरापाने प्रायश्चित्तमुपाह ज्ञानमद्यपाने प्रायश्चित्तमाह यः पुनरज्ञानतः पौष्ट
कं तु ह्याद्य सुरां मद्यं वा ब्राह्मणः पिबति ये च ब्राह्मणा द्वयो रेतो विण्मूत्रं वाऽग्निं प्राश्नंति ते
त्रयो द्विजातयो वर्णाः सकृच्छ्रं कृत्वैवं पुनरुपनयने प्रायश्चित्तमर्हंति अत्र मद्य
पाने योयं पुनः पुनः संस्कारो ब्राह्मणस्यैव तन्निपवैश्ययोस्तत्स्य तु ज्ञात्
र्तिंनतत्वात् सुरापानकृच्छ्रं त्रमधापरः प्रायश्चित्तमस्यातिलघुत्वात् अज्ञानतो गुल्य
सुरापाने द्वादशवार्षिकस्य विहितत्वाच्च अत एव गौतमेनाप्यमद्यपानं प्रकृतिः
मत्या मद्यपाने पयो घृतमुदकं वायुं प्रति त्र्यहं तप्तानि पिबेत्स कृच्छ्रः ततोस्य संस्का

सा शुनी गृध्री सूकरी चोपजायते ४ द्विजातिभार्यां प्रत्याह या द्विजातिभार्या सुरां पिबति साकृतप्राय-
श्चित्ता पतिलोकं न याति किं त्विहैव लोके शुनगृध्रसूकरलक्षणासु तिर्यग्योनिषु क्रमेण जा-
ति ब्राह्मणीग्रहणं चात्र त्रिवर्णोपलक्षणं एवं चेति न्यायेन यस्माद् द्विजातेर्या वैत्यो भार्या सा-
सामुपलक्षणं श्रुतपवमतः पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत् पतितार्द्धशरीरस्य
निष्कृतिर्न विधीयत इति धर्मार्थकामेषु सहाधिकारात् दंपत्योरेकशरीरत्वमिति वा य-
तो यस्य द्विजातेर्भार्या सुरां पिबति तस्य भार्यारूपस्यार्द्धशरीरस्य निष्कृतिर्न विधीयते तस्मा-
द्विजातिभार्यया सुरा न पातव्या तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति प्रतिषेध-
विधौ लिंगस्याविवक्षितत्वेन वर्णत्रयाणामपि भार्याणां प्रतिषेधः सिद्ध एव न वचनं द्विजा-
तिभार्यायाः शूद्रायाश्च पि सुराप्रतिषेधप्राप्त्यर्थं अतो द्विजातिभार्यया सुरापानप्रायश्चि-
त्तार्हं कार्यं शूद्रभार्यायास्तु शूद्रायाः शूद्रवदेव न प्रतिषेधः सुरापानसमेषु निषिद्धभ-
क्षणेषु द्विजु सुरापानप्रायश्चित्तमुक्तं प्राक् ४ इति सुरापानप्रायश्चित्तप्रकरणं ८ ब्राह्म-
णस्वर्णहारी तु राजे मुसलमर्पयेत् स्वकर्म ख्यापयंस्तेन हतो मुक्तोपि वा शुचिः १ अ

नाभ्यासे तु सुरापात्रस्थितं वर्णस्य तोयं पिबेन्मरणान्तो भवतीति वसिष्ठोक्तं मरणान्तिकं तु शु
द्रो नात्र सुरापानाद्यपेक्षमभिप्रायः तस्मात् सकृत्पानेपि मरणान्तिकस्य दर्शितत्वात् मद्यवा
सितमूत्रभांडोदकस्याज्ञानतः पाने शूद्रस्य मेनोक्तं मद्यभांडस्थितं तोयं यदि कश्चित् पिबे
द्द्विजः कुशमूलविपक्वेन ब्रह्मकूर्चेन व्रतये येपेदिति अज्ञानेनाभ्यासे तु वसिष्ठेनोक्तं म
द्यभांडस्थितं तोयं यदि कश्चित् पिबेद्द्विजः पद्मोडुंबरबिल्वानां पलाशस्य कुशस्य च
पत्रे षाम्बुदके पीत्वा षड्रात्रेण विशुध्यतीति ज्ञानतः पाने तु विल्लस्मृते मद्यभांडस्थितं
तोयं पीत्वा पंचरात्रेण शंखपुष्पीशृतं पयः पिबेदिति ज्ञानतोभ्यासे शंखेनोक्तं मद्यभांड
स्थितं तोयं पीत्वा सप्तरात्रेण गोमूत्रयावकं पिबेदिति अज्ञानतोभ्यासे हारीतेनोक्तं मद्यभां
डस्थितं तोयं यदि कश्चित् पिबेद्द्विजः द्वादशाहं तु पयसा पिबेद्ब्राह्मी सुवर्चलामिति प
धवाक्ये पुनर्द्विजग्रहणं ब्राह्मणाभिप्रायं तु त्रिपदवैश्यपारशौनकधादिति दर्शितं तेनाकु
ष्टे च गौडीमाध्वीभांडस्य जलपानविषये गफतानायापश्चित्तं स्पतालादि मद्यभांडो
दकादिपानेकल्प्य ३ पतितोकं नमापानित्राह्मणेगाप्तगोपिवेन रहेव ऋक रोगदो

मि. ट.
प्र. यं.
११७

226

स्नवधे सनकल्प: शृहारानेनोजीवन्नपि विशुध्यतीति ननु तादृशेन एव राज्ञा मनुः शुद्धेद-
पमन्त्र: कस्मान्नेष्यते उच्यते अनन्तुरुनेन सो राजेति गौतमो येनाऽनेन मनुर्वेनादोषाभिधा-
नात् सवनराज्ञो दोषस्तथाप्यतिक्रान्तनिषेधेन राज्ञा स्तेहादिना मनुः ; लेन: कथं न शु-
ध्येदिति चेत् उच्यते एवं च सत्य कारणिका शुद्धिरापनेत् अशेषाच्यते सोतोन्नरकाले
द्वादशवार्षिकाद्यनुष्ठानेन शुद्धोगौक रणाज्ञाकारणेनेति ननु दृष्टदेवे मनुः ; शुवि-
रिति सोऽपि सौवर्णचिह्नेन नाभिधानात् अतः प्रागेव व्याख्यातो उपायो इदं च मरणान्-
तिकं सावर्णिकस्यापहर्तेनेव ब्राह्मस्यैव ब्राह्मणसुवर्णहारीति नैमित्तिकवाक्ये विशे-
षानुपादानात् तन्निमित्ताच महापातकिनां विशेषास्मापश्चित्तांतरस्यानाम्नानाच्च
यत्तु नमीनेव सुवर्णस्तेयपकृ द्विपद् इति विग्रहेण तत्र मात्रोपलक्षणं प्रायश्चित्तोपदे-
न रद्दीति तस्यैव प्रकृतत्वात् ब्रह्महत्या सुरापाने स्तेने ऊर्ध्वं गनागम इत्यादिनिमित्तवाक्ये वि-
शेषानुपादानाच्च तस्मात् पातक नैमित्तिकवाक्ये सुवर्णस्तेयप्रकृ द्विपद् इत्यत्र श्रूयमाण-
मण्युपलक्षणमेव पक्षे यथायुदितेष्वपाप स्पष्टहविरिति वाक्ये तंडुलग्रहणं हविर्मा-

११७

थक्रमप्राप्तं सुवर्णस्तेयप्रायश्चित्तमाह ब्राह्मणस्वामिके सुवर्णे योपहरन् स सौवर्णस्तेयी
सुवर्णस्तेयं मया कृतमित्येवं स्वकर्म ख्यापयन् राज्ञे मुसलं समर्पयेत् मुसलसमर्पणस्य
हननार्थत्वात् तेन मुसलेन राजा तं हन्यात् तेन राज्ञा हतो मुक्तो वा शुद्धो भवति अपहरण
शब्देन च समस्तपरोक्षे वा बलाच्चौर्येण वा किंयादिस्वर्णे हते विनाशहेतुच्यते मुसलं सम
र्पयेदिति यद्यपि सामान्येनोक्तं तथापि तस्य हननार्थत्वात्तत्समर्थस्यायोमयादेर्ग्रह
णं अत एव मनुनोक्तं स्कंधेनादाय मुसलं लकुटं वापि खादिरं शक्तिं वोभयतस्तीक्ष्ण
मायसं दंडमेव चेति शंखेनाप्यत्र विशेष उक्तः सुवर्णस्तेनः प्रकीर्णकेशोऽथार्द्रवासा
आयसं मुसलमादाय राजानमुपतिष्ठेदिदं मया पापं कृतं तमनेन मुसलेन घातयस्वेति
स राज्ञा शिष्टः सन् शुद्धो भवतीति हनने चावृत्तिविधानाभावात्सकृद्देवकार्यं अत ए
व मनुनोक्तं ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयमिति स एवं सकृत्ताडनेन हतोऽम
तः शुद्धो मुक्तो वा मरणं जीवन्नपि विशुद्धो दीति यावत् तथा च संवर्तेनोक्तं ततो मुस
लमादाय सकृद्धन्यात्ततः स यदि जीवति स स्तेनस्तेनपापाद्विमुच्यत इति यथोक्तं बृ

227

विधानात् नञा तु ब्राह्मणो हन्यादित्यस्य प्रायश्चित्तस्य त्रिंशिका देहहूपहनन विषयत्वे नाप्यु
पपत्तेः एतत्तु मरणान्तिकं सन्निहितवेलविषयं मरणान्ते हि प्रोक्तं प्रायश्चित्तं मनीषिभिः
तत्तु कामकृते पापे विज्ञेयं नात्र संशयः इति मध्यमाङ्गिरःस्मरणात् अत्र च सुवर्णशब्दः
परिमाणविशिष्टहेमद्रव्यवचनो न जातिमात्रवचनः जालसूर्यमरीचिस्थं त्रसरेणुरजः
स्मृतं तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते गौरस्तु ते त्रयः षट् ते यवो मध्यमस्तु ते त्रयः
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडशेति षोडशमाषपरिमिते हेम्नि सुवर्णशब्दस्य प
रिभाषितत्वात् अतो ब्राह्मणसुवर्णापहरणं महापातकमित्यादिप्रयोगेषु उक्तपरि
माणस्यैव सुवर्णस्यापहरणे ग्रहणं फलं परिमाणग्रहणस्यादृष्टार्थत्वात् नन्वदृष्टार्थप
रिमाणस्मरणं नापि लोकव्यवहारार्थं अतत्परत्वात्स्मृतिकारप्रवृत्तेः अतएवोक्तं
न्यायविद्भिः कार्यकोऽस्ति संज्ञापरिभाषयोरुपस्थानमिति तयोर्नामापि गुणफलो
पनिबंधनार्थवदित्युक्तं पञ्चदशान्याज्यानीत्यत्र न च दृष्टमात्रोपयोगिपरिमाण
स्मरणमिति फलं तावन्मात्रार्थेन शमाणाभावात् अतो विशेषात्सर्वशेषत्वमेव युक्तं

त्रस्य इदं च राज्ञा हननं ब्राह्मणव्यतिरिक्तस्य न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थित
मिति मानवे ब्राह्मणवधस्य निषिद्धत्वात् यदि कश्चिदेतेन निषेधेन राज्ञा हन्यते तथा
पि शुद्धो भवति वधेन शुद्ध्यति स्तेनो ब्राह्मणस्तपसैव वेति ब्राह्मणस्यापि वधेन शुद्ध्य
भिधानात् न च तपसैव वेत्येवकारेण वधनिषेधः तस्य केवलतपसापि शुद्ध्यभि
धानपरत्वात् यदि वधनिषेधपरस्तर्हि तपसैव वेति विकल्पाभिधानमनुपपन्नं न च
दण्डाभिप्रायेण विकल्पाभिधानं तस्यानिर्दिष्टत्वात् किं च एकार्थास्तु विकल्पेरन्निति
न्यायेनैकार्थानामेव विकल्पो व्रीहियववत् इह च न च दण्डतपसोरेकार्थता दण्डस्य दम
नार्थत्वात्तपसश्च पापक्षयहेतुत्वात् न च वधेन शुद्ध्यति स्तेन इति सामान्यविषये वधे

व

ब्राह्मणस्तपसैवेति विशिष्टविषयस्य तपसो विकल्पोपपत्तिः न हि भवति ब्राह्मणे
भ्यो दधि दीयतां तक्रं कौण्डिन्यायेति विकल्पः तस्माद्रूपान्तरेपि सामान्यविषयत्वमे
व यद्यात्तद्विषयस्यापि न निषेधः मनुना सुवर्णस्तेयप्रकृतोद्देश्य अभिधाय प्रगृहीतं मु
सलं राजा सकृद्धन्यात्ततस्त्वयमिति सर्वनाम्ना अशक्तः तत्र ब्राह्मणपरामर्शेनैव हननं

मे. त.
स.
११६

228

228

वत्सरेणपर्यवकारणात् किं विस्मृतं सुवर्णोपहारविषये सुवर्णोपहारे मन्त्रादिमहात्स्यते
पुत्रादशवार्षिकविधानात् वलाद्येकामकारेणमृदहे तिततेराधमाः तेषांचैवाप
हर्तुं एणं प्राणेणतिक मिहोच्यते सुवर्णपरिमाणेन द्वीगपीतान्मिथेते दृष्टेचस्तेपप्राप
स्थितमपह. तेयतेततस्वामिनेदत्तैवकार्पणेस्तेपेप्रसस्वस्मतस्यसुवर्णेदे : कृतेपुनः स्वा।
मिनेपह. तेदेयंहर्त्तातेकादशाधिकमिति तथा चरेत्सां तपनेकृत्वेतन्निरीशांत्यात्मश
दुयद्रतिमनुस्मरणात् देद्यप्रकरणेणमुक्ते शेषेष्येकादशगुणं दाप्यमस्मैचततद्धतमि
ति यत्तातशक्याराराजाहेतुमसमर्पंलब्दावसिद्धोके द्रस्वेवे स्तेनः प्रकीर्णके प्रारजा
नमितिपांचेततततस्मैराजेतुवरेशस्तुदृष्टाणांतेनात्मानेप्रमापयेत्मरणान्ते तोभ
वतिद्रतिविज्ञापनद्रति श्रोऽहेवरमपेयपादिपिहितोयप्रापयिद्वृतेतेनाके निष्कालकोऽधुना
कोगोमयाग्निनापादप्रमस्त्यात्मानेप्रमापयेत्मरणान्तेभवतीति विज्ञापनद्रति त
दपिगुरुश्रोत्रियपागस्यादिविप्रद्रव्यापहारविषयंतत्रियापघपहर्तव्येविषयेवा तत्रति
कालकद्रतिनिगल्केपापममुल्लोमाभिधीयते तथास्त्रमेधायचप्रमानेनवा पथाव

११६

किंच दंडस्य दमनार्थत्वात् दमस्य परिमाणविशेषमंतरेणापि सिद्धेर्नातीव परिमाणस्म
रणमुपयुज्यते प्राह्यैकसमधिगम्यं तु महापातकत्वादावेको तेन स्मार्त्तस्मरणमुपयुज्य
ते अतः षोडशमाषात्मकसुवर्णपरिमितहेमहरण एव महापातकित्वं तन्निमित्तमर
णांतिकादिप्रायश्चित्तविधानं च द्वित्र्यादिमाषात्मके हेमहरणे तु त्रिपादिहेमहरणव
दुपपातकमेवेति युक्तं. किंच सुवर्णन्यूनपरिमाणहेमहरणे प्रायश्चित्तांतरोपदेशात्
तत्परिमाणस्यैव हेम्नो हरणे मरणांतिकादिप्रायश्चित्तमिति युक्तं. तथा चोक्तं षट्त्रिंश
न्मते वालाग्रमात्रेऽपहृते प्राणायामं समाचरेत् लिक्षामात्रेऽपि च तथा प्राणायामत्रयं
बुधः राजसर्षपमात्रे च प्राणायामचतुष्टयं गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये
गौरसर्षपमात्रे च सावित्रीं वै दिने जपेत् यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयं सुवर्ण
कृष्णलैकमपहृत्य द्विजोत्तमः कुर्यात्सांतपनं कृच्छ्रं तत्पापस्यापनुत्तये अपहृत्य
सुवर्णस्य माषमात्रं द्विजोत्तमः गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति सुवर्ण
स्यापहरणे वत्सरं पावकी भवेत् ऊर्ध्वं प्राणांतिकं ज्ञेयमथवा ब्रह्महव्रतमिति इदं च सं

मि-न-
११०

229

वट्ट्रापि दोष इति वाच्यं यस्य वर्णश्च हन्तं ताटेवनद्यां स्नानं स्व इष्टे दिव्यस्य विषयः
यद्वैदेमनस्मापाषधानाश्रणवव्याहृ तोर्मनस्माज्ञपेत् व्याहृत्यश्राणमोइयाविरादे
वरेस्यहृत्तोकृ क्षे द्वादशगाग्रे चरेदिति न दपिसमागर्थ्य सहृत विषये श्र तोने हृणामस्ता
नन: स्वर्णापहारश्रापश्चित्रानिमित्त किं नरजनादिदृष्ट्या इष्टवाकृ एवं स्वर्णापहारः श्र
स्मिन्नेव विषये यदापहर्तास्यतेमहाधनस्तदास्मनल्लिनेस्य वर्णोदघ्यात् अथ्यतावद्गृने
नास्ति न पश्चीयापाँचापश्चाकृ स्तदाविशतिहृक् द्विश्रयपावज्जीवेकृ देवभरणपर्यापुं
नपानुष्टिक्करेयनेदघ्यात् यदानुनिर्गुणस्वामिके द्रव्यमपहरति तदा एतदेवव्रतेस्त
न:पादेन्हनेसमाचरेदिति व्यासेनोक्तेनववार्षिके इष्टव्यं यदापुनरोहृणमेवत
त्वामकृद्रेवपरिरत्नणार्थमपहरति तदाविंशति पादितेषड्वार्षिके स्वर्जितादिकेवा
कृतुकृयात्नीर्थयात्रा षडहृवाचरेत् कृछूयजेद्वाकृनाहिजः तीर्थानिवाभ्रमोत्वि
द्वास्नतः स्तयादिमुच्यतइति यदातपहारसमनेनरमेवहाकथमूयाकृतमिति
ज्ञातानुतापः श्रत्यर्पयति त्यजतिवातदापल्लवीयं चतुर्थकालमितोशनेनत्रिवर्ष

११०

स्तेनसामरणान्तिकमभिधायोक्तं इष्ट्वा वाश्वमेधेन गोसवेन वा शुद्ध्येदिति एतच्च वि
द्वत्क्षत्रियापहर्तृविषये १ ब्राह्मणनिवृत्यर्थं येन शुद्ध्येत् स्तेयापव्रतमाचरन् ब्राह्मणस्य सु
वर्णं वा दद्याद्वा विप्रतुष्टिकृत् २ प्रायश्चित्तान्तरमाह स्वीयं स्तेयं राजन्यनिवेद्य स्तेयाप
व्रतं द्वादशवार्षिकमाचरन् शुद्ध्येन्न शवशिरोध्वजनकापालधारणनिराकरणार्थं
स्तेयापव्रतमित्युक्तं एतच्चाकामकारविषयं इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विज
मित्यकामतो विहितस्यैव द्वादशवार्षिकस्यातिदेशात् न चाकामतोपहार एव न सं
भवतीति कथं तद्विषयते उच्यते यदा वस्तुज्ञानं शौर्यतः सुवर्णादिकमज्ञानादपहर
ति रजतादिकं बुद्ध्वा वा हृत्य चानन्तरमेवान्यस्मै न दत्ते नाशितं वा न पुनः स्वामि
ने प्रत्यर्पितं न तदा सम्भवत्येवाकामतोपहारः यस्तु ताम्रादिकं सारसवेधाद्यापादित
सुवर्णरूपस्यापहारोऽनेन तत्रेदं प्रायश्चित्तं सुवर्णजातिसमवायाभावात् न च सुवर्णसा
दृश्यमात्रेण गौणं सुवर्णधर्मो भवतीति यद्यपि हरणमेवास्य सुवर्णं सुवर्णभ्रान्त्यापहर
ति तथापि नेदं प्रायश्चित्तं असुवर्णत्वापहारादेव न च स्पृहैव शुद्धा सन्नणवधे हत्यापीति

ऊनीर्युक्तपातनं अत्र हेत्रिरात्रमुपवासः स्तेनस्य कृच्छ्रेण चतुर्तेनाभवतीति न तस्य वीर्यं माषप
रिमाणसुवर्णापहारप्रायश्चित्तेन सह विकल्प्यते पञ्चमपरेतेनैवात्र सुवर्णस्तेयो
द्वादशरात्रं वा उपभक्तः एतेनाभवतीति न तस्मिन्माषापहारे अष्टकृच्छ्रस्य सन्तत्येवापरत्वाज्जिह्मी
र्षस्य वेदितव्यं अत्राभिहितो बालवृद्धादिविषयमेव प्रायश्चित्तं वेदितव्यं यानि चाष्टगत
मनुष्यस्त्रीक्षेत्रगृहहरणानन्तरं यत्नादिनानासुवर्णस्तेयसमत्वेन प्रतिपादितानि तेष्वप्ययमे
व कार्यं यत्तन्मनुस्मृतावभिशस्तिमनुवचनं नृपहन्ता द्विजो लोभाच्चरेद्द्वादशवर्षं व्रतं गवा
निदशकानीमासतातद्विगुणं चरेत् ग्रामसहस्रार्द्धे त्रिगुणं स्मृतं हेमविधिः स्मृतः
सर्वेषां धान्यलोहानां पारदे च समाचरेत् धान्यानां हरणे कृच्छ्रं तिलानामेतदेवस्तेते
गव्यानां हरणे विप्रस्यारेष्वाद्वादशवर्षव्रतमिति तद्दि गवानेकसहस्राद्यधिकरजतह
रणे सुवर्णस्तेयसमप्रायश्चित्तप्रतिपादकानां तदनलविहितं त्वर्थे यद्यपि तल्लाहार
वो द्वादशवर्षं ते तदपि गवानां सहस्राद्धीनस्वल्पगव्याप्रतेऽहरेत् वा उहेतनः सुवर्ण
स्तेयसमे इति सुवर्णस्तेयप्रायश्चित्तप्रकरणं ॥ अथ तन्नैवः शयनेसार्द्धमायस्यापोषि

मवस्थानेनोगिरसंवाचनाद्योत्रैवार्षिकं द्रष्टव्यं ननु प्रत्यर्पणेनत्यागे वापहारस्थानीयस्य
निष्पन्नत्वात्कथं प्रायश्चित्तस्याल्पत्वं यथा न निष्पन्नस्तदा प्रायश्चित्ताभावप्रसङ्गात्तत्प्रा
यश्चित्तस्याल्पत्वमेवं अपहारस्योपभोगादिकफलपर्यन्तत्वादुपभोगात्प्राक्छिन्नत्वाच्च
पक्षस्यापहारार्थस्याभावात्कृत्स्नमेव प्रायश्चित्तमल्पत्वं पीनत्वानद्वापेयं द्वैगुण्यं नन्वे
वं सति चौरहस्ताद्दुस्तादापहृत्यापहरणेपि तस्योपभोगलक्षणफलाभावात्प्रायश्चित्ता
ल्पत्वप्रसङ्गः मैवं तस्य त्यागे सति अहृताभावात् फलपर्यन्तेपहारे सति अहृतत्वाच्च य
स्तु रजतताम्रादि सप्तदशसुवर्णापहारे तत्र त्रैदेवलगुरुप्रायश्चित्तं पतः संसर्गोपि सुव
र्णादेनापीति प्रायश्चित्तमिव एषदाक्ये यन्त्वत्र द्वादशवार्षिकमेवेति फलं अयसुव
र्णसहस्रदोहवानरमेवेति लघुप्रायश्चित्तमुच्यते तर्हि द्वादशवर्षात्त्रैवार्षिकादिति
वचना अल्पसुवर्णत्वादेव किं त्वपणानक प्रायश्चित्तमेव यद्यप्यपरमापस्तंबोक्ते लिप
कृता स्मरेणापीताकृत्कृत्स्नं संवत्सरं चरेदिति तत्सुवर्णपरिमाणं स्वीकृत्य द्वौ त्रिगुणौ धान्याधिक
परिमाणं द्रव्यविषयं यत्तु समेन ना सुवर्णस्तेयी मासं समाविचार्य सहस्रमाज्या

त्याकांत्तायानेनश्रेयः प्रायश्चित्तिपरस्परस्मात्पेक्षितपैकतावगमादेककल्पनमेव य
क्तं शुश्रूषाद्यपेक्षणमलिंगोप्यस्य पमुक्तं त्यक्तिमाजलिनागरहीनानेकत्र त्याद्दिनिण्यतो
व्यावृत्तिशिदेहपातनमकृत्वैवलिगतिंगेताननुमन्तस्येत यथाहमनुः स्वपंचाशिरुहृष्ष
णावृत्त्य त्याधायचांजलो नेकत्र नीतिशमातिष्ठेदानिपानादजिस्पृगहुति गमने
हृष्टेनानीत्यमानेन कर्तव्यो द्वेगमशिरुहृष्णावृत्त्य त्यानेवक्ष्यमाणेवजेदि
तिशावेलिविनस्मरणेन एवं गच्छन्यत्रकुड्यादिनाशनिवाध्यतेतत्रैवमरणेन
तिष्ठेत स्वहृषणोशिरुश्मुक्त्य जलावाधाप्रदिग्गिमभिमुखो गच्छेद्यत्रैव प्रतिहत
स्तत्रैवतिष्ठेदाप्रलयादिति वसिष्ठस्मरणेन देहपातमेव यथाहनारदः प्रा
सादमग्नतमोगाच्छन्नाहुत जलमग्गडद्यानि शिशुर्योकर्तेनानत्रनोयोदेहोविधीयतइ
ति एवंच देहार्थमपिलिंगाद्यकर्तनप्रायत्प्रायमपि भवतीति इममेवचमरणा
तिकं देहमभिप्रेत्योक्तं मनुनाराजभिर्धृतदण्डास्तु कृत्वापापानिमानवाः निर्मलाः
स्वर्गमायांति संतः सुकृतिनोयथेति यत्तदेहेत्तः प्रायश्चित्तेभवत्येव प्रायश्चित्तेत्तु

नाशयेत् गृहीतोत्कृष्टग्रहणेनैकत्वादुत्कृष्टेनेतत् १ उद्देशक्रमप्राप्तं गुरुतल्पगप्रा
यश्चित्तमाह समा वा गुरुतल्पग इति वक्ष्यमाणश्लोकगतेन गुरुतल्पगपदमत्रैव
ध्यानेनैनेष : शयने यथा मरणान्तमेभवति तथास्तनेस्त्रिवर्णौक्तेनेकास्तायमेषा
यनेयोमय्यां स्त्रीं श्लिष्येति कृत्याप्यतत्र या सह गुरुतल्पगः स्वप्यात् एवं स्तनान्तेदेहमु
त्सृजेत्स्वपेनेति यावत् शयने च गुर्वङ्गनागमनेमयाकृतमित्येवं स्वकर्मविख्याप्य
ऊर्यात् गुरुतल्पाभिभाष्यैन इति मनुस्मरणात् तथान्तिस्त्रियमप्यालिंग्यकार्य ग
रुतल्पगोमस्तप्यत्तोमायसीं वास्त्रिय : इति कृत्तिमप्रिवर्णांकृत्वातामालिंग्य प्र
तोभवतीति बृहद्धारीतस्मरणात् तथावैमेड्रनलोमकेशोनहृत्ताभ्यकेनचकर्ते
वां निष्फलकोहत्ताभ्यवतलस्त्रोस्मीं परिष्वज्य मरणान्तश्चेता भवतीति विज्ञाय
तइतिवासिष्ठस्मरणात् नचगुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये स्तर्मीं ज्वल
न्तीं वाश्लिष्य मृत्युना स विशुध्यतीति मनुवाक्यात्गुरोर्येन तत्र लोहशयनेन तत्रयोषि
दालिंगनं च निरपेक्षं प्रायश्चित्तद्वयमित्याशंकनीयं प्रायश्चित्तापेक्षितास्वयनउ३ै

चार्याणांशतंपितेत्युपाध्यायाद्दशाधिकादाचार्यात्पितुरतिशयित्ववचनात् स एव मुः
ख्य इति वाच्यं आचार्यस्याप्यतिशयितस्याविशिष्टत्वेन उत्पादकब्रह्मदात्रोर्गरीयान्
ब्रह्मदः पितेति गौतमेनाप्युक्तं आचार्यः श्रेष्ठो गुरूणामिति किंच यद्यतिशयितमा
त्रेण मुख्यत्वमुच्यते तर्हि सहस्रमिति वचनान्मातैव गुरुः स्यात् तस्मात्सर्वे गुर
वस्तत्रीणां गमने गुर्वंगनागमनमित्युक्तं उच्यते निषेकादीनीति मनुवचनेनि
षेकादिकर्तुर्जनकस्य गुरुत्वप्रतिपादनपरेणान्यपरत्वात् यत्तु नवास्य गौतमव
चने तत्पित्रर्यादिपूजादिविधिविशेषणपरत्वात्तेषां स्तुत्यर्थानानान्यपरं गुरुत्वप्र
तिपादनपरा निषेकादीनीति मनुवचनात्पितरेव मुख्यं गुरुत्वमिति स्थितं अतएव
वसिष्ठेन आचार्यपुत्रशिष्यभार्यासु चैवमित्याचार्यादिदारेषु स्वीनि देशिके गुरुतल्पश
पथितमुक्तं तथा जातकर्मादिभिरप्युक्तं आचार्यादेस्तु भार्यासु गुरुतल्पव्रतेन चरे
दित्यादिना आचार्यादेर्मुख्यगुरुत्वे स्वपदेश्यानत्यर्थव्रतशास्त्रातिदेशोनर्थकः एवमा
तं किंच सेव जैनसम्प्रथमे चापि तदारग्रहणं कृतं पितृदारान्समारुह्य मातृवर्जं नराध

कुर्वाणः स वैवर्णपर्य्यन्तादिनं नोकाराज्ञाललाटेमूर्द्धास्थाम्नन्नमसाहस्रमितिनेने
वाक्रतान् अनेयोऽस्य मरणान्तिकयोरन्यतरानुष्ठानेन गुरुतल्पगः ॥ ऋत्विज ग
रुशब्दस्याप्रमुख्यापादन्मयापितरि वर्त्तते निषेकादीनि कर्माणि यः करोति यथावि
धि संभावयति चान्नेन स विप्रो गुरुरुच्यते इति मनुना गुरुत्वश्रुति पादने परेवाक्ये निषे
कादिकर्मजनकस्य वगुरुक्ताभिधानात् पार्गश्वरेण च निषेकादिकर्माभिप्रायेण
न संगृह्यते: किं पांक्तानां वेदमस्य प्रयक्तोनिनन गुरुशब्दस्यान्यत्रापि प्रयोगो दृश्यते
उपनीय गुरुः शिष्यमित्यादिना चार्य्ये स्वल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः
तमपीह गुरुं विद्यादित्युपाध्यायेऽन्यादेनाप्ययं प्रयोगो दर्शितः गुरवो मातापित्रु
पनेतृपत्याचार्यविद्यादातृज्येष्ठभ्रातृनिजोऽभयत्रातारोदातारोऽवेति नचानेकार्थ
कल्पनादोषः गुरुशब्दस्य प्रवृत्तिनिमित्तस्यैकतायाः पूज्यहेतायाः सर्वेष्वनुस्यूते द
र्शितत्वतस्मात् प्रवृत्तिनिमित्तत्वेपरोच्चर्येण पतेमान्यापयाऽऽपर्वे भ्योमाता गरी
यसी मान्यादेत्युपक्रम्य गरीयसीत्युपसंहारे कुर्वतानेन चोपाध्यायादूर्ध्वमाचार्य्यम्

द्रमतिदेशिकमितिनेवीशेष्यः इदंचमुख्यमेवषडब्दस्य इतरेषांपुनः षडब्दागौण
मणताद्देवषडब्दंते यथाहमनुः तेनजातीन्सनातनानेकादशपक्षांत्तेनान् षड
ब्दितिनिर्धानाकुः क्रियालोपान्मनीषिणःइति तत्राभयेच्छानः अभ्यस्तेनसकृत् यथन
इतित्रयमेप्रायश्चित्तं सेवनंप्रोक्तंसाहनेनत्वहोतोत्कृत्यहूषणेभ्यविहितहिनेपि: अत्र
वेधातिगायेनप्रायश्चित्तमस्यगुरुतुल्येवृत्ताननयाप्रोक्तस्याहितस्यमानेवतत्वेलोहश
यनज्वलतस्यमाल्लिंगनेयारन्यतरद्रष्टव्यं पत्रुशोवेनद्वादशवार्षिकमस्ति अधःशा
यीजटाधारीपर्णमूलफलाशनः एककालंसमश्नतोवर्षेनुद्वादशेगते रुक्मस्ते
यीसुरापश्चब्रह्महागुरुतल्पगः व्रतेनैतेनशुद्ध्यन्तिमहापातकिनस्त्विमे इतितस्य
वर्णेत्वमपित्यटागमनेकामकृतेद्रष्टव्यं तच्चैवकामतः अभ्यस्तेनसकृद्वा
द्विवृत्तौषड्वार्षिकमकामतस्त्रिवार्षिकेजनन्यांकामतः अभ्यस्तेनसकृत्प्राप्ति
वृत्तौद्वादशवार्षिकमकामतस्तुषड्वार्षिकमितिकल्प्यं पत्नसवर्णेनगुरुदारगम
मात्रसमानत्वेनैतत्पमस्यादिममीमोहणमात्रेनस्यक्रुक्कुः महीनवर्णगुरु

मइति षट्त्रिंशन्मतेपि पितृभार्यां तु विज्ञाय सवर्णां योधिगच्छतीति श्रुतो निषेका
दिकर्त्ता पितैव मुख्यो गुरुः तत्स्त्रीगमने वर्णचतुष्टयेप्यविशिष्टं निषेकादिकर्तृत्वस्या
विशेषात् अतः सवित्री गुरुरुच्यत इति विग्रहग्रहणमुपलक्षणं अतः पितृपत्नीगम
ने महापातकं गमनं च चरमधातुविसर्गपर्यंतेन कृत्यमतेऽत्रनतन्मात्रं वीजं इतोन्यम
हापातकं तेन तच्चेदेवाभ्य शयने साहमित्याद्युक्तं मरणांतिकं प्रायश्चित्तं द्रष्टव्यं तच्च
जनन्यामकामकृते तत्सपत्न्यां तु सवर्णायामुत्तमवर्णायां च कामकृते द्रष्टव्यं पितृ
भार्यां तु विज्ञाय सवर्णां योधिगच्छति जननीं चाप्यविज्ञाय सतः शुद्धिमवाप्नुयादिति
षट्त्रिंशन्मते विधानात् जनन्यां कामकृते वसिष्ठोक्तं कालकोहूतनाभ्यक्तो गोमया
ग्निना पादप्रभृत्यात्मानमवदाहयेदिति द्रष्टव्यं अकामतोऽभ्यासे त्वेतदेव ननु मा
तुः सपत्नीं भगिनीमाचार्यतनयां तथा आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्प
ग इत्यतिदेशाभिधानान्मातृसपत्नीगमने त्वातिदेशिकं प्रायश्चित्तं तत्समफले
ऽस्याने पितृभार्यां सवर्णामित्यस्मादेव सवर्णग्रहणादेव सवर्णासपत्नीविषयम

नेद्दृष्टव्याः वैश्यायां गुरुभार्यायां कामतो गमने षड्वार्षिकं अत एव स्मृत्यन्तरे ब्राह्मणीषु
त्रस्य क्षत्रियायां मातुः सपत्न्यां गमने पादोनं द्वादशवार्षिकमेवमन्यवर्णेष्व प्यम
र्थः ब्राह्मणीषु त्रस्य क्षत्रियायां सपत्न्यां गमने पादोनं द्वादशवार्षिकं नववार्षिकमि
ति यावत् न स्यैव तस्या नुमतायां वैश्यायां षड्वार्षिकं शूद्रायां त्रिवार्षिकं प्रायश्चित्त
मिति एवं क्षत्रियायां ब्रह्मवैश्यायां मातरि नववार्षिकं शूद्रायां षड्वार्षिकं एवमेव वै
श्यायां ब्रह्मण्यपीति वैश्यायां कामतो भ्यासे मरणान्तिकमेव गुरुभार्यायां यो वैश्याम
त्वा गच्छेत्तु नः पुनः लिंगाग्रच्छेदपिंडान्ततः शूद्रो त्सर्किल्विषाद्विति लोकात्तिस्मर
णात् शूद्रायां कामतो भ्यासे द्वादशवार्षिकं पुनः शूद्रां गुरोर्गत्वा बुद्ध्याविशः समाहि
तः ब्रह्मचर्यमदुष्टात्मा मवरेद्द्वादशाब्दिकमित्युपमन्युस्मरणात् क्षत्रियायां गुरुभा
र्यायाम बुद्धिपूर्वं गमने पमोक्तं त्रिवर्षमब्दमकालाशने द्वष्टव्यो कालेष्टमेवाभ्यज्ञानो ब्रह्म
चारी सदा व्रती स्थानासनाभ्यां विहरं स्त्रिरह्नो भ्युपयन्नपः अयः शायी त्रिभिर्वर्षैस्तद्योपा
हेत पातकमिति यच्चैवाभ्यासे जानतः कार्पण्यौक्तं गुरोः तत्सत्भार्यायां तु गता न काम

द्वादशेन ःसकाद्देवीं गुरुभृत्यः १ प्राजापत्येनैवैकेन कृच्छ्रेण समा वा गुरुतल्पगः चान्द्राय
णैर्वा त्रीन्मासानभ्यसेन्वेदसंहितां २ प्रायश्चित्तान्तरमाह अथवा प्राजापत्येन कृच्छ्रे
ण वक्ष्यमाणलक्षणेन समा वर्षत्रयं चरेत् एतत्प्रायश्चित्तत्रयं शूद्रजातीयगुरुभार्याग
मने मतिपूर्वे द्रष्टव्यं यदा तु गुरुपत्नीं सवर्णां व्यभिचारिणीं मतिपूर्वं गच्छति तदा वे
दसंहिताजपचान्द्रायणत्रयं कुर्यात् तत्रैव कामकृतावेशेन गुरुतल्पाभिगामी संव
त्सरं ब्रह्महत्याव्रतं षण्मासान्वा तप्तकृच्छ्रव्रतं चरेदिति द्वितीयागमने तु मतिपूर्वे याज्ञ
वल्कीये मातृसपत्नीं भगिनीमाचार्यतनयां तथेति गुरुतल्पातिदेशात् द्वादशवार्षिकं द्रष्ट
व्यमिति देशिके सवर्णागुरुभार्यागमनविषयं भवति तत्र कामतोऽमरणान्तिकस्याका
मतो द्वादशवार्षिकस्य विहितत्वात् अतः त्रैविद्यादिविषयमेवेति पक्षे तत्रैव काम
तोऽभ्यासे मरणान्तिके प्राप्ते गतागतेन भार्यागमे :तत्र स्मृत्यन्तरं :पञ्चाभ्यां रहितो लिङ्ग
मुत्कृत्य समस्तं :शुचिर्निर्ऋतिकापवस्सृगङ्गानं अत्रैव विषये प्रायश्चित्तं पदानं चिकीर्षितं
तदा छित्त्वा लिङ्गवृषणं समस्तं कामाया :स्त्रियास्तथेति याज्ञवल्कीये प्रोक्तं :प्रायश्चित्तं स्या

तावदेवेति अत्रैवाकामतः प्रवृत्तस्यैतत् सकामतस्त्वेक एवोक्तं कृच्छ्रं वा चान्द्रायणं तप्तकृ-
च्छ्रमतिकृच्छ्रं तथैव च सकृद्गत्वा गुरोर्भार्यामज्ञानाल्लिप्यते द्विजः इति तथा शातातपो हि
तस्यातिकृच्छ्रः अभ्यासे तु प्रवृत्तस्य तप्तकृच्छ्रः तेन शातातपोक्तं चान्द्रायणं वै
प्राजापत्यं कामतः प्रवृत्तस्यैतत् सकामतस्त्वेकं निवृत्तो क एवोक्तं तप्तकृच्छ्रं पराकं च तथा
सान्तपनं गुरोः भार्यां वैश्यां सकृद्गत्वा बुद्ध्या मासं चरेद्द्विजः इति अत्राभ्यासे त्वकामतः प्र-
वृत्तेति तप्तकृच्छ्रः तेन शातातपोक्तं पराकः तथा शातातपोक्तं तस्य सान्तपनं तेन अत्रैवाकामतः
प्रवृत्तस्य प्रजापतिस्त्वाह पञ्चरात्रं चरेन्नाम्ना यात्स्त्राश्यं वातथैव च वैश्यां भार्यां गुरोर्ग-
त्वा सकृद्दत्तानन्तो द्विजः इति तथा शातातपोक्तं तस्य पञ्चरात्रं अभ्यासे त्वकामतः प्रवृत्तस्य सप्तरात्रं
तेन शातातपोक्तायामष्टरात्रं शूद्रां प्राप्य कामतः प्रवृत्तस्यैतत् सकामतस्त्वेकं निवृत्तो जा-
बालिराह अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च गुरोः शूद्रां सकृद्गत्वा बुद्ध्या विप्रसमा-
चरेदिति तथा शातातपोक्तं तस्यातिकृच्छ्रः अभ्यासे त्वकामतः प्रवृत्तस्य तप्तकृच्छ्रः तेन शातातपोहि-
तायां पराकः तत्रैवाकामतः प्रवृत्तस्यैतत्सम प्राजापत्यं सान्तपनं सप्तरात्रं वा

ते:॥ अंब्द्माद्धे समुत्पन्नस्तु शूद्रोऽजीवन्स्तेनोपि वा इति वैश्यायां तु कामतो गमने प्राजाप
त्यं च चेत्कृच्छ्रमेव तदेव याज्ञवल्क्यीये तथा च वृद्धमनुः गमने तु गुरुभार्यायाः पितृभा
र्यां गमे तथा: शूद्रा द्वयमकामस्तु कृच्छ्रं नित्यं समाचरेदिति तत्रैवाभ्यासे हारीतो कं मर
णांतिकं प्रायश्चित्तं तु ब्रह्मचर्यं अभ्यासे विप्रा वैश्यायां गुरोरज्ञाने माहित: षड्ङ्गब्रह्म
चर्यं च सचरेद्यावत्पञ्चषमिति गुरुभार्यायां शूद्रायां तु मतिपूर्वे मानवे स्वदारगीवो
रवासा वा श्मश्रुलो विजने वने प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहित इति अथवा
गुरुदाराभिगामी संवत्सरं कृच्छ्रं चकिनीणा वा यावपरिशुद्धस्याथ: प्रायश्चित्तविषवणीभे
त्राहाराहतो भवतीति कूर्ममतं तत्रैवाभ्यासे मानवे चान्द्रायणं वा त्रीन्मासानभ्य
सेद्विप्रपनैद्विपइति तत्रैव याकामत अकृत्तस्यैत: शोकोदत्वा द्विहुत्तो वाशोकं
कृच्छ्रं चैवातिकृच्छ्रं च तथातिकृच्छ्रातिकृच्छ्रके चरेन्मासत्रयं विप्र: तत्र विप्रागमने ग्रो
विति अत्रैवं व्यवस्था तत्राभ्यासाहितस्पत्रैमासिके प्राजापत्यचरणं उभयेच्छातः
शूद्रतस्यातिकृच्छ्रचरणं तावदेव तेन प्रासाहिताया पादन कृच्छ्रातिकृच्छ्रा त्वाग्ने।

मि॰ ता॰
१२२

426

र्षिकं नववार्षिकं प्रायश्चित्तं विज्ञेयं । अस्मिन्नेव विषये कामतोऽन्त्याभ्यासे मरणान्तिकं
तथा च बृहद्यमः । रेतः सिक्त्वा कुमारीषु स्वयोनिष्वन्त्यजासु च । सपिण्डापत्यदारेषु प्राण
त्यागो विधीयत इति । अन्त्यजाश्चात्र चाण्डालः श्वपच २ क्षत्ता ३ सूतो ४ वैदेहिक ५ स्तथा
मागधा ६ योगवौ चैव ७ सप्तैतेऽन्त्यावसायिन इति मध्यमाङ्गिरसोदिता वा । रजक
श्चर्मकारश्चेत्यादिना उक्ता वा लघुलघुप्रायश्चित्तस्योक्तत्वात् । तथा चाण्डालाम
न्त्यजां गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं च गच्छतीति चाण्डाला
दिसाम्यं प्रतिपादयता मनुनापि कामतोऽभ्यासे मरणान्तिकं दर्शितं । तथा हि यस्तु
न तु चाण्डालीगमनाभ्यासे पतत्यतः पतितप्रायश्चित्तं द्वादशवार्षिकं कार्यमिति कामतो
ऽन्त्याभ्यासे चाण्डालैः साम्यं गच्छत्यतो द्वादशवार्षिकानधिकारान्मरणान्तिकं कार्या
त् तत्र बहुकालाभ्यासविषये एकवाराभ्यासे तु वर्षत्रयं यथाह यमः । यः करोत्येकरा
त्रेण वृषलीसेवनं द्विजः । तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहतीति । अत्र वृषलीशब्देन
चाण्डाल्यभिधीयते चाण्डाली वधकी वेश्या रजस्वला या च कन्यका ऊढा या च सगोत्रा

१२२

सेके । गुरोः पुत्र्यां सकृद्गत्वा चरेद्द्विजः समाहित इति तथा श्रोत्साहितस्य प्राजापत्यं उभ
योरिच्छातः अकामतो सांतपनं तेन श्रोत्साहितायां सवर्णायां प्रवासइत्यनये वद्विगुणान्येषा
मपि स्मृतिवचसां विषयव्यवस्था ऊहनीया गुरुपत्नीगमनमप्यत्र महापातकिनमविशि
ष्ट तथाह कात्यायनः एतद्दोषस्य शुद्धिस्तु पतितानामुदाहृतः स्त्रीणामपि प्रसक्तानां
मेष एव विधिः स्मृत इति यतस्त्वस्याप्यकामतः अकामतो मरणांतिकमविशिष्टं यत ए
व गुरुपत्नस्य मरणांतिकमुक्तं स्त्रियाश्चापि योगस्य तेन मरणांतिके दर्शिते द्विता लिंग
वधस्तस्य सकामायाः स्त्रियास्तथ्येति अकामतस्तु मनुनोक्तं एतदेव व्रतं कार्यं योषि
त्सु पतितास्वपीति द्वादशवार्षिकं पादकृच्छ्रं न यास्कार्यं यानि गुरुतल्पसमानि स
खिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतमि
ति प्रतिपादितानि यानि चातिदेशविषयस्तानि पितुः स्वसारं मातुश्च मातुलानीं
स्नुषामपि मातुः सपत्नीं भगिनीमाचार्यतनयां तथा आचार्यपत्नीं स्वसुतां गच्छंस्तु
गुरुतल्पग इति प्रतिपादितानि तेष्वकामाद्गमने सकामतोभ्यस्ते तु पराकमेण षड्

भगिन्यादिगमनस्य तल्पतायोगात् यत्तु बृहद्यमोक्तं चण्डालीं पुल्कसीं म्लेच्छीं स्नुषां च
भगिनीं सखीं मातापित्रोः स्वसारं च निक्षेपशरणागतां मातुलानीं प्रव्रजितां स्वगो
त्रां नृपयोषितां शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेदिति यच्चाङ्गिरोवचनं प
तितान्यस्त्रियं गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्वीत चान्द्रायणमथापि वेति
तदुभयमपि गुरुतल्पातिदेशविषये अकामतः प्रवृत्तस्य रेतःसेकादर्वाक् द्रष्टव्यं
यदपि संवर्तवचनं भगिनीं मातुलानीं च स्वसारं चान्यगोत्रजां एता गत्वा स्त्रियं मोहा
त्तप्तकृच्छ्रं समाचरेदिति तदनेनैवोक्तं एवंविधविषये कामतः प्रवृत्तस्य रेतःसेकादर्वाग्द्र
ष्टव्यं यदा पुनरेता एवान्त्यव्यभिचारिणीर्गच्छति तदापीदृशमेव प्रायश्चित्तं पुंश्चलेचा
न्द्रायणं तप्तकृच्छ्रं वात्मके क्रमेण कामतोऽकामतश्च प्रवृत्तौ द्रष्टव्यं साधारणस्त्रीषु गुरुतल्पो
पभुक्तास्वपि गमने गुरुतल्पदोषो नास्ति जात्युक्तं पारदार्यं च कन्यादूषणमेव च साधा
रणस्त्रियो नास्ति गुरुतल्पत्वमेव चेति व्याघ्रस्मरणात् एवमन्यान्यपि स्मृतिवचनान्य
त्रावचनप्रायश्चित्तप्रतिपादनपराण्यपि विषयव्यवस्थयोहनीयानि गोष्ठमेरमयात्र

227

१२८

स्यात्तद्वयबल्यः पंचवैरस्यनाद्भनिरस्तत्वं तेरे चंडाल्यां वृषलीशूद्रप्रयोगदर्शनात् बंधकी
स्वैरिण्योः कथं पुनरत्राभ्यासावगमः । उच्यते यः कश्चिदेकरात्रेण त्वत्यंतसंयोगाय व
र्गीवाचिन्यास्तृतीयपादर्शनात् एकरात्रेण चात्यंतसंयोगो गमनाभ्यासे विनानुपप
त्तेरिति गमनाभ्यासोवगम्यते अतएवैकरात्रादूर्ध्वकालाभ्यासविषयं प्रागुक्तं द्वाद
शवार्षिकादिगुरुतल्पव्रतातिदेशिकं मरणांतिकं च यत्पुनर्ज्ञानतोज्ञानतो वा चां
डाल्यादिसंसर्गे ऊर्ध्वं निंदाचांद्रायणं कृत्स्नं संतानं गतोभक्ष्यं चैव पाषितं कृत्स्नं द्विमाचरे
त् ज्ञानाद्ज्ञानात् द्वे वृत्त्यामिति यमाघकृत्सेवस्मरेकृत्स्नं ज्ञानतोज्ञाने चांद्रायणद्वयं पंचव
र्षाणि क्रमेण द्रष्टव्यं स्वयोनिषु त्यजाम चैनकताकारसमभिव्याहाराद्गंगमत्रादिष्वपीय
मेव व्यवस्थावेदितव्या मरणांतिकं चाग्निप्रवेशने जनन्यां च भगिन्यां च सुतायां च तथै
व च स्नुषायां गमने चैव विज्ञेयमतिपातकं अतिपातकिनस्त्वेते प्रविशेयुः हुताशन
मिति कात्यायनस्मरणात् जनन्यादिसंसर्गे मने भगिन्यादिषु चासकृद्गमने अग्निप्रवे
शइति इत्येवं महापातकस्य जननीगमनस्यातिदेशविषयस्यातिपातकस्य च

नएवमनुनासामान्येनैनस्विमात्रप्रतिषेधःकृतः एनस्विभिरनिर्णिक्तैर्नार्थंकिंचित्स
माचरेत् योयेनपतितेनाप्येषांसंसर्गंयातिमानवः यथा तेसंसर्गंव्रजेत्सोऽपि:प्राय
श्चित्तेनैकेनसमेतीति एतच्चब्रह्महादिष्वाब्दिकादिपतितप्रायश्चित्तंतुहिएवंकसंसर्गिविषयं
पतितेनसहोषित्वाजानन्संवत्सरंनरः मिश्रितस्तेनसोऽब्दान्तेस्वयंचपतितोभवेदिति
देवलस्मरणात् अज्ञानतःसंसर्गेतुनवैशिष्ट्येनोक्तं पतितसंप्रयोगेनब्राह्मणवायौनेन
वायौनेभ्यःसकाशान्मात्राद्युपलब्ध्वातामसापोदित्यागस्तेषुनसंवसेद्दोषीगत्वान
ब्रह्मसहिताध्यापनमधीयानःपतितोभवतीति विज्ञायतइति तथा ब्रह्महामद्यपःस्ते
नस्तथैवगुरुतल्पगः एतेमहापातकिनोयश्चतैःसहसंवसेत् सहैतिनेतितिसर्वेना
मपरामृष्टत्वकृतब्रह्महादिचतुष्टयसंसर्गिणएवमहापातकित्ववचनात्संसर्गिसंस
र्गिणांनमहापातकित्वं नत्रमहापातकिसंसर्गएवमहापातकित्वहेतुर्नब्रह्महादि

विशेषसंसर्गस्तत्सव्यभिचारात्ततोब्रह्महादिसंसर्गिसंसर्गिणोपिमहापातकिसं
संसर्गित्वात्तस्यापिमहापातकित्वंस्यात्तच्चप्रतिषेधःउच्यतेस्यादेव यदिब्रह्मा

लिंग्येते इतिगुरुतल्पप्रायश्चित्तप्रकरणम् ८ एभिस्तुसंविशेद्योवैवत्सरंसोपित
त्समः कन्यांसमुद्वहेदेषांसोपवासामकिंचनां १ एवंब्रह्महादिमहापातकप्रायश्चि
त्तमभिधायाधुनातत्संसर्गिप्रायश्चित्तमाह एभिःपूर्वोक्तैर्ब्रह्महादिभिरेकेसंवत्स
रंयोत्यंतसंवसतिसहाचरतिसोपितत्समः योयेनसहाचरतिसतदीयमेवप्रायश्चि
त्तंकुर्यादिति तदीयप्रायश्चित्तार्थातिदेशार्थंतत्समग्रहणं नपुनःपातकित्वातिदेशा
र्थंतस्यपश्चात्तैःसहसंवसेदित्युपदेशात एवसिद्धत्वात् अतश्चसत्यप्यतिदेशत्वेकृत्स्नमे
वद्वादशवार्षिकंकार्यंसाक्षान्महापातकित्वात्संसर्गिणः अपिशब्दान्नकेवलंमहा
पातकिसंयोगेनतत्समः किंतर्हिपातकउपपातकादीनामप्ययेनसहसंसर्गंक
रोतिसोपितत्समइति तदीयमेवप्रायश्चित्तंकुर्यादिति दर्शयति अतएवमनुनासकल
प्रायश्चित्तजातमभिधायाभिहितं योयेनपतितेनैषांसंसर्गंयातिमानवः सतस्यैव
व्रतंकुर्यात्तत्संसर्गविशुद्धय इति विसृज्यापिसमानत्वेनोपपातकाद्येनस्विमात्रसंस
र्गेतत्प्रायश्चित्तमाहुर्देशिने पापात्मायेनसहयःसंसृज्येतसतस्यैवव्रतंकुर्यादित्य

व्रतग्रहणवाच्यत्वाभावात् अतोत्र कामकृतेपि संसर्गे द्वादशवार्षिकं अकामतस्तु
तदर्द्धं संसर्गश्च स्वनिर्वर्त्यैककर्मभेदादनेकधाभिधीयते यथाह बृहस्पतिः एक
शय्यासने १ पंक्ति २ भांड ३ पक्वान्न ४ मिश्रणे ५ याजनाध्यापने ६ योनि ७ स्तथा च
सहभोजने ८ नवधा संकरः प्रोक्तो न कर्त्तव्योधमैः सह इति देवलोपि संलापस्पर्श
निश्वाससहयानासनाशनात् याजनाध्यापनाद्योनात्पापं संक्रमते नृणामिति
एकशय्याशयनमेकत्वेनासने पंक्तिरेक पंक्तिभोजने भांडं पंक्तिरेकभांडे पचने पक्वान्नं
मिश्रणं संसर्गस्तदीयपात्रभोजनमिति यावत् याजनं पतितस्य स्वस्य वा तेन अध्याप
नं तस्य स्वस्य वा तेन योनं तस्मै कन्यादानं तस्मात्कन्याग्रहणं वा कन्यायाः प्रतिग्रहः सह
भोजनमेकत्र भोजनं संलापः संभाषणं स्पर्शो गात्रसंमर्द्दः निश्वासः पतितमुखवा
युसंपर्कः सहयानमेकत्र रथाद्यारोहणं एषां मध्ये केन कर्मणा कियता कालेन

पातित्यमित्यपेक्षायां बृहद्विष्णुनोक्तं संवत्सरेण पतति पतितेन सहाचरन् ए
कयानभोजनासनशयनैर्योनस्रौतमौखैस्तु संबंधैः सद्य एवेति अत्रैकभोजनमेक

णोन्तरगम्ये महापातकित्वं स्यात् । शास्त्रैकसमधिगम्यत्वं तस्मिन्नेवं भवितुमर्हतीति ने
ति तत्प्रकृ । ति विशेषपरामर्शिना सर्वनाम्ना ब्रह्महादिविशेषसंसर्गस्यैव महापा
तकित्वहेतुत्वस्यावगमितत्वात् । एवं च प्रतिषेधाभावो प्यहेतुशास्त्राभावादेव संस
र्गिसंसर्गिणो दुर्जातिकर्मण्योः हानिर्न भवति । प्रायश्चित्तं तु भवत्येव न च संसर्गिसंस
र्गिणः पातित्यहेतुत्वाभावादेव कथं प्रायश्चित्तमिति वाच्यं । एतैस्त्रिभिरन्त्यैर्नैनो
ऽथ किंचित्स्याच्चेदिति सामान्येन निःसमाद्रसंसर्गप्रतिषेधेन महापातकिसंसर्गि
संसर्गिस्योपप्रतिषिद्धत्वात्पातित्याभावेपि यत्किंचिदेव प्रायश्चित्तं । एतच्च पादहीनं पा
येन संवत्सरं कृत्वर्षं सोपि तत्समतामियात् । पादहीनं चरेत्सोपि तस्य संसर्गवान्द्विजः इति
व्यासोक्तेः द्रष्टव्यं । एवं च तत्पंचमस्यापि कामतः संसर्गिणोऽर्द्धहीनं त्रिपादोनं वेद
ष्टव्यं अतः मातांग्रस्य ब्रह्महादिसंसर्गिणाण्ववनंतप्रायश्चित्ताधिकारेण संसर्गिसंस
र्गिणाद्यतिसिद्धं । तत्र च ब्रह्महादिषु पंचस्वपि कामतो मरणान्तिकं रूपदेहनं तथापि
संसर्गिणस्तु ज्ञानतदिष्टपतेः सततत्सैव तत्रेव पादोनितत्तस्यैवातिदेशात् मरणस्य च

मि· त·
र·
१३१

230

श्रितं तत्सहितेन तृष्टर्णं एवं च मन्ये भिक्षु संवत्स संघो वै वत्स रंसो पि तत्व मजीति सा गो ब्भुर
वचनमपि सहपानादिवितृष्णपूपरमेव यः केयतः संलापादीनां दृष्यकातन्त्यहेतत्वं
नास्त्येव मनुना संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्नतु या
नासनाशनादिति यानादिचतुष्टयमेव संवत्सरेण पातित्यहेतवो नोक्ता अत्राशने ग्रह
णं शयनस्योपलक्षणं अत्र च संवत्सरेण पतति पतितेन सहाचरन्निति यानासनादि
शनादिति व्यवहितेन संबंधः प्राग्दर्शितविष्णुवचनानुरोधात् तथा संवत्सरेण प
तति पतितेन सहाचरन् भोजनासनशय्यादिकुर्वाणः सार्वकालिकमिति देवलव
चनात् न चानन्वयदोषः यानासनाशनादिहेतोराचरन्नाचारं कुर्वन्निति भेदेनाव
तायां संबंधोपपत्तेः तथैव पाठक्रमे प्रसमितता प्रतीति यद्वा चरन्निति सप्तम्याः हेत
र्थस्यागमितत्वात् यानासनाशनादिति द्वितीया पंचमी याजनाध्यापनाद्यौना
न्नतु संवत्सरेण पतति किंतु सद्य एव प्राचीनवचननिचयानुरोधात् एवं अतो यौना
दिचतुष्टयेन संसृष्टः सद्यः पतति यानादिचतुष्टयेन तु संवत्सरेण निरंतराभ्यासेनेति

१३१
दे

पंक्तिभोजने एकपात्रभोजने च सद्यः पातित्वं कामतः एकभोजने च सद्यः पातित्वं याज
ने योनिसंबंधे स्वाध्याये सहभोजने कृते सद्यः पतत्येव पतितेन न संशय इति देवलस्म
रणात् श्रौतशब्देन याजनं मुख्यशब्देन मुखभवत्वेनाध्यापनं यौनश्रौतमुख्यैरिति
सत्यपि द्वंद्वनिर्देशे प्रत्येकमेव तेषां सद्यः पतनहेतुत्वं पःपातित्वे सहश्रौयौनमुख्यश्रौ
तानां संबंधानामन्यतमसंबंधकृत् यात्तस्याप्येत देवप्रायश्चित्तमिति च मतस्मरणात् प
कपानादिचतुष्टयस्य तु समुच्चितस्यैव पतनहेतुत्वे एकपात्रभोजनासनशयनेति तात
देन रथकारानानिर्देशात् प्रत्येकानुष्ठानस्य पतनहेतुत्वाभावेपि दोषहेतुत्वमस्त्येव प्र
सनाच्छयनाद्यानात्संभाषात्सहभोजनात् संक्रामंति हि पापानि तैलबिंदुरिवांभसी
ति पराशरवचनेन निरपेक्षाणामपि पापहेतुत्वावगमात् संलापस्पर्शनिश्वासाना
तु पानादिचतुष्टयेनानुषंगिकत्वपापसमुच्चितानामेव पतनहेतुत्वेन स्पष्टस्य[illegible]तानांप्र
त्यत्वात् पापहेतुत्वे तु न स्नेव संलापस्पर्शनिश्वासैस्तैः केवलवचनस्य दर्शितत्वात्
यतः संलापादिरहिते सहपानादिचतुष्टये कृते पंचमभागेन द्वादशवार्षिकप्राय

मि. प्र.
८.
१३२

232

श्चित्तार्द्धमाचरेत् याजनाध्यापनयौनानामेकपात्रभोजनानां च एषां सान्तानिरपव
वन्नमेतदकामतोऽत्यंतापदि पंचमहायज्ञाद्यभिप्राये याजनेनाध्यापनेहि दुहितृभ
गिनीव्यामिश्रितैश्च योनिसंबंधः ऽव्यश्रत्न्रः याजनादिभिः मनुः पातित्यमोक्तेत्वात्
पनोहितगवलवनेनैव दुहितृभगिनीस्नुषागाम्यतियानकिं संसर्गिणः कामतो नववा
र्षिकं अकामतः सार्द्धचतुर्वार्षिकं कल्पनीयं सविपित्स्त्र्यादारादिपातकादिसंसर्गि
णः कामतः षड्वार्षिकमकामतस्त्रिवार्षिकं तथोपपातकयादिसंसर्गिणामपि काम
तस्तदीयमेव त्रैमासिकमकामतोऽर्द्धमित्यूहनीयं पुरुषवत्स्त्रीणामपि महापातका
दिसंसर्गान्यातितत्समं विशिष्टं यथाह देवलः पुरुषस्य यानि पतननिमित्तानि स्त्रीणा
मपि तान्येव ब्राह्मणी हीनवर्णसेवायामधिकं पततीति एतस्तासामपि महापातकी
पस्त्रीनामध्यायेन सह संसर्गस्तदीयमेव प्रायश्चित्तमर्द्धकृच्छ्रा याजनीयं एवं बालवृद्धा
तुराणामपि कामतोऽर्द्धमकामतः पादः तथात्र पनीतस्यापि बालस्य कामतः पा
दो कामतस्तदर्द्धमित्येषादिक् पतितसंसर्गप्रतिषेधेन प्रतिषिद्धस्य योनसंबंधस्य चकचि

१३२

यः सै संवत्सरं सोपि तत्समः इत्युक्तं तेन संयोगवाचित्वाद्विनो पापादर्शनात् अंतरितत
न दिवसगणनाकार्या यथा षष्ठ्यादिकं मानं ग्रंथदिवसव्याप्ति संसर्गे संभवति तेना
न्येनैव न पतितप्रायश्चित्तं किं तु मदेव यथाह पराशरः संसर्गमाचरन्विप्रः पतितादिष्व
कामतः पंचाहं वा दशाहं वा द्वादशाहमथापि वा मासार्द्धं मासमेकं वा मासद्वयमथा
पि वा अब्दार्द्धमब्दमेकं वा भवेदूर्द्धं तु तत्समः त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्
चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव च चतुर्थे दशरात्रं स्यात्पराकः पंचमे मतः षष्ठे
चांद्रायणं कुर्यात्सप्तमे त्वैंदवद्वयं अष्टमे च तथा पश्चात्षण्मासे कृच्छ्रमाचरेदिति कामतः
संसर्गे पुनर्विशेषः स एवानंतरमभिहितः पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं पराकस्त्व
र्द्धमासे स्यात् मासे चांद्रायणं चरेत् मासत्रितये कुर्यात् कृच्छ्रं चांद्रायणोत्तरं षण्मासे कृत्वा
संसर्गे कृच्छ्रं त्वब्दार्द्धमाचरेत् संसर्गे त्वाब्दिके कुर्यात् द्वे चांद्रायणे नरः इति अत्र चाब्दिकेसं
सर्ग इति किंचिन्न्यूनमिति द्रष्टव्यं पूर्णे वत्सरे मन्वादिभिः द्वादशवार्षिकस्मरणात् पंचाब्दा
हे स्यात्तावत् षाण्मासिके च संसर्गे याजनाध्यापनादिना एकत्रासनशयनादिः प्राय

पद्वा सर्वांत्यजानां गमने भोजने संप्रमापणे पराकेण विशुद्धिः स्यादित्यंगिरःस्मरणाच्चेति
पराकं ऊर्ध्वं तत्र कामतः सूतादिवधे चान्द्रायणं अकामतस्तु सूतवधे पराकः वैदे
हकवधे पादोनः चण्डालवधे द्विपादः मागधे पादोनः पराकः ततो द्विपादः आयोग
वकवधे पादद्वयं ऊन एवं वदिष्ण चान्द्रायणं स्यात् पिनारतस्य कल्प्यं यत्तु ब्रह्मगर्भवचनं प्रति
लोमप्रसूतानां स्त्रीणां मासमावधिः स्मृतः एतत्प्रभवानां च सूतादीनां च तद्द्विगुणमिति
तदावृत्तिविषयं तत्र सूतवधे षण्मासा वैदेहकवधे चत्वारः चण्डालवधे द्वाविति पाग्यत
यान्वयः तथा मागधवधे चत्वारः ततरि द्वैमासिकमायोगेववधे द्वैमासिकमिति
व्यवस्था नैमित्तिकव्रतानां तपोधसाधनत्वाद्विधाविरहिणं चर्मकारादीनां तदनुप
पतेराज्याव तदर्णोद साध्यो स्त्रिवोधानामनधिकारमाशंक्याह यद्यपि शूद्रो जपाद्यधि
कारहीनस्तथाप्यनेन द्वादशवार्षिकादिकालसंपाद्यनव्रतेन शुध्यतीति शूद्रग्रहणं प्रति
णां प्रतिलोमजानां चोपलक्षणं यद्यपि तस्य गायत्र्यादिजपासंभवस्तथापि नमस्कार
मंत्रजपो भवति अतएव स्मरन्ति गेमिहितं उच्छिष्टं चास्य भोजनं मन्त्रज्ञानं नमस्कारो मंत्र

त्रमिति श्रसवमाह एषां पतितानां कन्यां पतितावस्थायामनुत्पन्नां सोपवासो हुतेन तत्संसर्गी
कालोचितप्रायश्चित्तमकिंचनामगृहीतवस्त्रालंकारादिपित्र्यधनामुद्वहेत् कन्या
समुद्वहेदिति वदन्स्वयमेव कन्यात्यक्तृपतितसंसर्गं समुद्वहेद्व्रपुनः पतितहस्तात्प्रतिग्र
हो यादिति दर्शयति एवं च सति पतितयोनसंसर्गप्रतिषेधविरोधोपि परिहृतो भवति
अयं चार्थो हहहारीतेन स्पष्टीकृतः पतितस्य कुमारी विवस्त्रामहोरात्रोपोषितां प्रातः
शुक्लेनाहतवाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे
वोद्वहेदिति वचनात् स्त्रीव्यतिरिक्तात् तदीयापत्यसंसर्गो न हेतोर्दर्शयति अतएव वसि
ष्ठः पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी तामरिक्थामुपेयादि
ति इति संसर्गिप्रायश्चित्तप्रकरणम् ॥ चान्द्रायणं चरेत्सर्वानवकृष्टान्निहत्य तु शूद्रोधि
कारहीनोपि कालेनानेन शुद्ध्यति ॥ निषिद्धसंसर्गप्रायश्चित्तप्रसंगात् निषिद्धसंसर्गो
त्पन्नप्रतिलोमवधे प्रायश्चित्तमाह यमः अवकृष्टाः सूतमागधादयः प्रतिलोमोत्पन्नास्तेषां
प्रत्येकं हनने चान्द्रायणं तथा च शातातपः सर्वेषामवकृष्टानां वधे प्रत्येकं चान्द्रायणमिति

वधप्रायश्चित्तेनाचरेदाह गोहंतीति गोघ्नः सकलविभजादित्वात्कप्रत्ययः प्रथमे मासे संयमा
हितव्रत आसीत किं कुर्वन् पंचगव्यं पिबन् पंचगव्यानि गव्यानि च गोमूत्रगोमयदु
ग्धदधिघृतानि पयांसि विधानेन मिश्रितानि पिबन् आहारांतरपरित्यागेन भोजनकार्ये तत्स्थाने
धानात् तथा गोष्ठेशयः प्राप्तशयनानुवादेन गोष्ठविधानाद्दिवा च स्वापनिषेधाद्रा
त्रौ गोष्ठे शयानः गाश्चानुगच्छतीति तदेवव्रतमिति गोऽनुगामी व्रतेषु नित्य
स्थितः अनेनोपासो गोष्ठे शेते सन्निधानान्नापवगाः प्रातर्वने प्रतिचरंतीरनुगच्छेत्
अनुगच्छेदिति वचनाद्यदा च गच्छंति तदैव स्वयमनुगच्छेद्यदा तु तिष्ठंत्यासते वा तदा
पश्चाद्गमनस्याप्राकृतकरणात्स्वयमपि तिष्ठेदासीत वेति गम्यते अनुगमनविधा
नादेवताभिः साकं गोष्ठव्रजनं ताभिः सह गोष्ठप्रवेशः प्रसिद्धः एवं कृत्स्नं मासं नीत्वा गो
प्रदानेन एकां गां दत्त्वा तावता पापात्स्वार्थं संपन्नो गोहत्यापापात् शुद्ध्यतीत्येकं व्रतं मासे
गोष्ठेशयो गोऽनुगामीति चानुवर्तते पंचगव्याहारस्य निवृत्तिः कृच्छ्रविधानादेव प्राप्त
त्वं मासमनिरंतरं कृच्छ्रं समाहितमनाश्चरेदित्यपरे अतएव जाबालेन मासं प्राजापत्यस्यह

इति यद्वावचनबलाज्जपादिरहितमेवव्रतं तस्मात्कृच्छ्रं समासाद्य सदा धर्मपथे स्थितः
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमित्यंगिरःस्मरणात् तथापरमपि तेनैवोक्तं
शूद्रः कालेन शुद्धेन गोब्राह्मणहिते रतः दानैर्वोपवासैर्वा द्विजशुश्रूषया तथेति
यत्तु मानवं नचास्यापदिशेद्धर्मं नचास्य व्रतमादिशेदिति शूद्रस्य व्रतोपदेशनिषेध
परवचनं तत्तपमन्त्रशूद्राभिप्रायं यदपि स्मृत्यंतरवचनं कृच्छ्राण्येतानि कार्याणि
सदा वर्णैस्त्रिभिर्नृप कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयत इति तत्काम्यकृच्छ्राभिप्रा
य श्रुतप्रवृत्तो शूद्रेयाः प्रतिलोमजानां चैव वर्णिके तत्त्वनाधिकार इति सिद्धं यत्तु गौ
तमवचनं प्रतिलोमा धर्महीना इति तदुपनयनादिविशिष्टधर्माभिप्रायं इति महापा
तकप्रायश्चित्तप्रकरणं १ पंचगव्यं पिबन्गोघ्नो मासमासीत संयतः गोष्ठेशयो गोनु
गामी गोप्रदानेन शुद्ध्यति १ कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः दद्यात्त्रिरात्रं चो
पोष्याहृषभैकादशास्तु गाः २ महापातकादिपंचकमध्ये महापातकातिपातकयोरनु
पातकप्रायश्चित्तानुक्त्वाथोपपातकप्रायश्चित्तानि व्याचक्षाणः पाठक्रममनादृत्य गो

मि॰ त॰
त॰
२३५

234

समतिकृच्छ्रेऽरण्यान्यतिकृच्छ्रेतान्यद्यो विरात्रत्रये पाणिपूरान्नभोजनेनोक्तः। अंत्ये त्रिरात्रेऽम्
शनेनेत्यतिकृच्छ्रधर्मेण मासं व्रते क्रियमाणे षड्रात्रमुपवासो भवति। चतुर्विंशत्यहे च
पाणिपूरान्नभोजनमुक्तं ततश्च कृच्छ्रप्राजापत्याम्नायकल्पनया किंचिन्न्यूनेनैव पंच
कं भवतीति एवं स्मात्तनत्पानञ्चतयोर्यत्नेनैव पंचस्वामिकगोवधविषयतायुक्तानाह
शपथविषये भूरिस्वामिकगोहत्यायां मासं प्राजापत्यद्वितीयं ततः सार्द्धं प्राजापत्यत्रयात्म
के व्रतत्रयत्याम्नायेन किंचिदधिके धेनुद्वयं भवतीति एवं स्थाल्यन्नमत्वा त्वद्विषयतो
विततयाव्रतं चैतत्प्रायश्चित्तं चतुर्थं पंसाताकार्तं इत्याहकं प्रयोजकात्तुमन्तुष्ठत्रकल
घुभावृत्तारत्नमप्यापन्नयाहवाक्यः एवं विषये योजनीयं यत्तु वसिष्ठेनोक्तं गोघ्नस्य पंच
गव्येन मासमेकं पलत्रयं अत्याहं स्यात् न च कोपि वा चांद्रायणमथापि वेति यच्च काश्य
पीयं गोहत्वा तच्चर्मणा प्रावृतो मासं गोष्ठे शयानस्त्रिषवणस्नायी नित्यं पंचगव्याहार
इति यच्च षण्णतापीयं मासं पंचगव्याहार इति तत्सर्वमपि याज्ञवल्कीयपंचग
व्याहारसमानविषयं यच्च शांखलिखितप्रचेतोभ्यामुक्तं गोहंता पंचगव्याहारः। पंच

२३५

ष्यक्तं प्रायश्चित्तं तत्र मुक्तं प्राजापत्यं चरेन्मासे गोहन्ता चेदकामतः। गोहितो गोनुगामी
स्यात् गोप्रदानेन शुद्ध्यतीति श्रुतिकृच्छ्रं वा तत्पैव समाचरेदित्यन्यत्र कृच्छ्रातिकृच्छ्र
योर्लक्षणमुक्तं प्रत्यवस्थाने अथवा त्रिरात्रमुपवासः केनापि वृषभैकादशगोयासोगवा
नादद्यादिति वृत्तं च तत्रैव नत्वाकामकृते ज्ञातिमात्रब्राह्मणस्वामिकगोमात्रवधे
वृषभैकादशगोदानेन सहितं त्रिरात्रोपवासो द्रष्टव्यः। विशिष्टस्वामिकायां विशिष्ट
गुणवत्यां तु वधे गुरुप्रायश्चित्तस्यावद्यमाणत्वात् तद्विषयं संवोध्यन्यास्तु नाह विवधे
व्यापादने पञ्चगव्याशिनं प्रथमं प्रायश्चित्तं अत्र मासं पञ्चगव्याशितत्वस्यातिस्वल्प
त्वान्मासोपवासतत्त्वं तत्र षष्ठिः षष्ठिरुपवासैरेकैकं प्राजापत्यकल्पनया पञ्चकृ
च्छ्राणि प्रत्याम्नायेन पञ्चधेनवो मासो तेऽतीपमाना गौरेकेति षड्धेनवो भवन्तीति वृष
भैकादशगोदानसहितं त्रिरात्रं वृत्ताल्लव्यैपस्त्वं कपंणं नश्रोस्रणगवां नागु रुते देव
ब्राह्मणराज्ञां तु विज्ञेयं द्विगुणं व्रतम् मा मिति नारदेनतत् द्रष्टव्यं स्तोतमतानभिधानात् गोषु
ब्राह्मणसंस्थास्विति तद् उपपन्नदर्शनात् वैषयसंबोध्यन्यास्तु नाह विवध्या [illegible]

षयेवा विषमश्च्छेषोवा सन्नजनितव्याधिना मरणे विषयेवा वेदितव्यो नदीदेवर्णैष्प्रागु
क्तैः कामतो विषये पश्चात्पुनरोहं त्रिविधामेव विषस्तामितिशिष्टोगोकामतः प्रमापयेत्
नच्चामनुनामासे पञ्चगव्यपानेमासद्वयेन विषष्णे चतुर्थकालभोजनेमासत्रयेणवृषभे
कात्स्न्येगोघ्नव्रतेनसंपन्नकृच्छ्रेण कामादिनावर्तेनमितिव्रतत्रियमाम्नातं तथाह उपपातक
संपन्नोगोघ्नोमासंयवान्पिबेत् कृतवापोवसेद्गोष्ठेचर्मणातेनसंवृतः चतुर्थ
कालमश्नीयादक्षारलवणंमितं गोमूत्रेणचरेत्स्नानं द्वौमासौनियतेन्द्रियः दिवानुग
च्छेत्तागास्तास्तुतिष्ठन्नूर्ध्वं रजः पिबेत् शुश्रूषयित्वानमस्कृत्यरात्रौवीरासनेवसेत् तिष्ठ
न्तीष्वनुतिष्ठेत्तुव्रजन्तीष्वप्यनुव्रजेत् आसीनासुतथासीननियतोवीतमत्सरः आ
तुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः पतितां पङ्कमग्नां वा सर्वप्राणैर्विमोचयेत्
उष्णेवर्षतिशीतेवामारुतेवातिवाभृशं नकुर्वीतात्मनस्त्राणंगोरकृत्वातुशक्तितः
आत्मनोयदिवान्येषांगृहेक्षेत्रेथवाखले भक्षयन्तींनकथयेत्पिबन्तंचैववत्सकं अने
नविधिनायस्तुगोघ्नोगामनुगच्छति सगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपोहति वृष

विंशतिरात्रमुपवसेत्स्मृत्यंतरे विपन्नेकृतागोचर्मणाप्रावृतो गाश्चानुगच्छेद्गोष्ठेशया
योगोव्रत्यादिनेनतुयाज्ञवल्क्योपमासातिकृच्छ्रव्रतसमानविषयं द्रष्टांगिराव्ये
चोयोबाधेत्येतद्विषये वाल्येनगुणेननोहेनवैदितव्यं अन्नेवंविषयेपंचगव्याशन्
स्नानहिनीयंकारणपौरेय मासंपंचगव्येनेनप्रतिपादपष्ठेकालेपयोभक्तोगच्छे
तोश्चनुगच्छेत्स्नासस्नोवापीवसूत्रस्वच्छापविशन्नातिस्त्र्वंगच्छेत्त्रानोविषमेणवतारये
न्नालोकेपायपेदिति वृत्तांतेब्राह्मणभोजयितातिलधेनुंदद्यादिति दुष्करबृहन
प्पापस्यगोघ्नोमासंपंचगव्यंहप्रस्तिनेन्द्रलम्पूनोभंजानोगोस्थः प्रियंवेकृध्य
तीतिपेठीमसिनोक्ते वे द्विन्त्यापन्नसमेवरक्तेवानुगंत्रस्यगोप्रदानेगोहेशपनेहा
दशरात्रेपंचगव्यप्राशनेचगवामनुगमनेचेति यन्नुसंवर्तेनोक्ते शक्तुपावकमेत्वा
प्रेणपेयात्दधिवृतेशक्तुतु पतानिक्रमणशनोयान्मासार्द्धेनसमाहितः ब्राह्मण
तुभोजयित्वातुगांदद्यात्सन्मणुद्रपरंति यन्नुवार्हस्पत्येद्वादशरात्रेपंचगव्याहार
इतितद्व्रतयमापियाज्ञवल्क्योयमासप्राजापत्येनसमानविषयं स्तनकल्पगोहत्यावि

नोति तत्सवनस्थस्यात्रिपणोमात्रवधे कामकृते द्रष्टव्यं यत्तु वसिष्ठेन गां हत्वा [illegible] स्या
स्तु चर्मणार्द्रेण परिवेष्टितः षण्मासान्कृच्छ्रंकृच्छ्रं कृच्छ्रं वा तिष्ठेदृषभौ वेहतौ चदद्यात्॥ इ
ति षण्मासिकं तप्तकृच्छ्रं तप्तकृच्छ्रानुष्ठानमुक्तं यदपि देवलेन गोघ्नः षण्मासान्सल्व
र्मपरीतो ग्रामाहारो गोव्रजनिवासी गोभिरेव सह चरंश्चरन्मुच्यत इति तदुपमपि
हारीतोयेन समानविषयं तच्चैव कामकारकृते कात्यायनीये त्रैवार्षिके गोघ्नस्य ब्र
र्मसंवीतो वसेद्गोष्ठे यवाश्चनः गास्त्वनुगच्छंस्तानं मौञ्जी वा गामनादिभिः वर्षद्वि
तानन्तल्लेपणवोह्यपकमपाटितः सोतत्वेत्स्वर्वपतेनेनह्पतेवत्सैस्त्रिभिरिति द्रष्टव्यं
यत्तु शङ्खेन त्रैवार्षिके पादेन शूद्रहत्यायाः गुरुकस्यागमनेन तथा गोवधे च तथा कुर्यात्स्व
रस्त्रीगमनेन तथेति तदपि कात्यायनीयव्रतसमानविषयं यत्तु यमेनाभिगवसोमिति
कर्तव्यानामभिधायाभिहिते गोसहस्रं दानेन वापि दद्याच्चरितव्रतः अविद्यमाने
सर्वस्वं वेदविदे निवेदयेदिति गोसहस्रफले गोदानफलं वेदे मासिकव्रतमभिहि
तं तत्र यदा सवनस्थस्याहिताग्नेर्दुर्वृत्तव्रजकूटविप्रस्य गोसर्वधिनीकपिलाकामगा

य

भैकादशगाश्च दद्यात् सुचरितव्रतः अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति य
त्तु त्रिनयाज्ञवल्क्योक्तं मासं पंचगव्याशनं वृषभैकादशगोदानात्मकं त्रिरात्रोपवास
रूपं व्रतं तत्र तत्र विषयव्यवस्थया क्रमेण द्रष्टव्यं यत्तु गिरसा मानवेतिकर्त्तव्यताफलं त्रैमा
सिकमभिधायाधिकमभिहितं ज्ञातार्लवणं हुतं षष्ठे काले स्याभोजनं गोमतीं वा
जपेद्विद्वानोंकारं वेदमेव वा व्रतं न द्वारयेदेषैं समत्रां चैवमेविल्लामिति एतन्मानववि
षयं एव वृद्धिहीनां रूपं एकान्त्यादि किं च ततु गुणातिशययोगिन्या द्रष्टव्यं अतिवालामति
वृद्धामतिवृद्धां च रोगिणीं हत्वा पूर्वं विधानेन चरेदर्द्धं व्रतं द्विजः इति वृद्धिहीनां रूपं एवा
दिरहिताया गविस्तुल्य प्रायश्चित्तदर्शनात् यत्तु याज्ञवल्क्योपमासान्तिकं कृच्छ्रव्रतं नि
मित्तमस्तंगामविशिष्टस्वामिकाजातिमात्रयोगिनीं कामतो व्यापादयति तदा विहि
तेयदकामानोकामात्तद्विगुणं भवेदिति न्यायेन एवोक्तमेवाकामविहितं मासाति
कृच्छ्रव्रतं द्विगुणं कर्यात् यत्तु हारीतेन गोघ्नस्तच्चर्मोर्द्धवाले परिधायेत्यादिना मान
वीयमितिकर्त्तव्यतामभिधायोक्तं वृषभैकादशगाश्च दद्यात् [illegible] भव

यदि प्रायश्चित्तं कथं तत्र शास्त्रैः शास्त्रैर्विधीयते काष्ठसंतपनं कर्पास्त्राजापत्यं तत्र लोष्ठ
के तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकं प्रायश्चित्तं तथा चौरेऽग्रे पश्चाद्ब्राह्मणभोजनं
त्रिंशद्वा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणामिति तत्र सर्वेषां गोसहस्रपणत्वादिदानं चैवाति
काद्विव्रतविषये पृष्ठवकाष्ठादिसाधनविशेषजनितवधनिमित्तसंतपनादिव्यवस्थाप्रति
पादनपरं न तु निरपेक्षं लघुतादृष्टस्मृत्यावयोविशेषादपि प्रायश्चित्तविशेष उक्तः । अ
ति वृद्धामतिकृशां वा बालां च रोगिणीं हत्वा एवं विधानेन चरेदर्द्धव्रतं द्विजः । ब्राह्म
णान्भोजयेच्छक्त्या दद्याद्धेमतिलांस्तथेति नीरोगादिविषये पद्यहिते तस्यार्द्धं वृद्धत्वं च
चेतसा यथात्र विशेषो दर्शितः । एकवर्षं हते वत्से कृच्छ्रपादो विधीयते अबुद्धिपूर्वे तु सम्या
त् द्विपादस्तु द्विहायने त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति तथा गर्भिण्याव
धे यदा गर्भोऽपि विहितो भवति तदा तन्निमित्तं नैमित्तिकमावर्तनीयमिति न्यायेनाविशेष
ण द्विगुणप्राप्तौ षड्विंशन्मतेन विशेष उक्तः । पादमुत्पन्नमात्रे तु द्वौ पादौ दृढतां गते पादोनं
व्रतमुद्दिष्टं हत्वा गर्भमचेतनं अंगप्रत्यंगसंपूर्णे गर्भे चेतनः समन्विते द्विगुणं गोव्रतं कुर्या

ऋतो गर्भिण्यां वृद्धीयां तरुण्यां त्यादिगुणगणशालिनीं निर्गुण्यां न वा सप्रतिज्ञः ब
ह्मादिना व्यापादयति तदा गोसहस्रफलकं द्वैमासिकं उपातं गर्भिण्यां कपिलादोग्ध्री
होमधेनुवसप्रतेना ब्रह्मादिना घातयिता द्विगुणं व्रतं समाचरेदिति विशिष्टायां गवि
हिंसायां वा हेमन्त्ये प्रायश्चित्तविशेषदर्शनात् अत एव प्रचेतसा ह्रो गर्भिण्यां गोमर्मि
ण्यां बालवधे भ्रूणहा भवतीति नाहरिवधमेव गोवधमभिसंधाय पञ्चसहस्त्या व्रतम
तिदिष्टं द्विती यत्तु याम्य गोशतदानफलके द्वैमासिके व्रते कान्यापनीयत्रतं विषयेधनव
तोद्दिष्टं यत्तु गौतमेन ऋषभैकशतगोदानसमन्वितं त्रैवार्षिकं प्राकृतं ब्रह्मचर्यं वे
दपवेधमभिधाय गोवधे प्रोक्तादिष्टं गां च हत्वा वैश्यवदिति एतत्त्रैवार्षिकं व्रतं शतमासा
यमृतं नवतिधेनुभिः सार्द्धं ऋषभैकशतं नवनवतिं द्विगुणं भवतीति गोसहस्रफलकं द्वै
मासिकं व्रतान्नूनत्वात् सर्वोक्तं विषयपदाकामतो वधे यत्नात्त्रैवर्षिकं गर्भरहिता
याः कामतो वधे दिष्टं नाहरिवधाया एव गर्भरहिताया स्वकामतो हनने पित्
त्वापनीयमेव त्रैवार्षिकं कल्पयत्नु यमेनोक्तं काष्ठलोष्ठाश्मभिर्गोवध [illegible]

मि॰ त॰
प्र॰
१३५

238

प्रवृत्तस्याकामतः प्रतिकूलौषधदाने व्यास आह औषधं लवणं चैव पुण्यार्थमपि
भोजनं अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत् अतिरिक्ते विपत्तिः स्यात् कृच्छ्रपादो
विधीयत इति एतच्च प्रायश्चित्तं नोक्तं पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत् योजने पाद
हीनं स्याच्चरेत्सर्वं निपातने इति तत्र च हननव्यापारेण निमित्तकर्तृविशेषेण साक्षा
त्कर्तुः साक्षात्कर्तुर्निमित्तिनस्तु भेदेनैव दर्शितः पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन
वा बलात् निपातयंति ये गां तु तेषां सर्वं विधीयते तथैव वाङ्गिरोहारुणपाशुशैवादि मो
टनैतिरिनिपतनं कृतं भवति पाषाणलगुडादिभिर्गोवामोटनादिना वा ये गां निपातयंति सा
क्षात्कर्तारः एवं तेषां कृच्छ्रं तत्र प्रायश्चित्तं कृत्स्नं पतनव्यवहितरोधबंधनादिव्यापारयोगिन
स्तन्निमित्तिनस्तेषां न कृत्स्नं पुनः सर्वं कृच्छ्रः किं तु तदवयवैरेव पादद्विपादादिभिरेवेति न
च रोधनादौ नाव्यवहितव्यापारत्वाविशेषेपि वचनान्नकृच्छ्र विवादः क्वचिद्विपादः पा
दोनं कृच्छ्रं विहितमिति फलं यथाह पाराशरः गोर्वाबंधनयोक्त्रैस्तु भवेन्मृत्युरकामतः अ
कामकृतपापस्य प्राजापत्यं विधीयते प्रायश्चित्तं तथा चीर्णं कुर्याद्ब्राह्मणभोजनं अने

१३५

देषा गोनुस्यानिष्कृतिरिति वहुकर्तृके तु हनने संवर्तापस्तंवौ विशेषमाहतुः एका चेद्व
हुभिः क्वापि दैवाद्व्यापादिता क्वचित् पादं पादं च हत्याया यास्तुरेयुः पृथक् पृथगिति याह
विधेर्गोहत्यायां यद्व्रतमुपदिष्टं तस्यात्पादं पादं प्रत्येकं कुर्युरिति वचनात् एका चेदित्यु
पलक्षणं अतो वहुभिर्हतायां वहूनां च व्यापादने चैवं इति प्रत्येकं पादं पादं पादोनं वा कल्प
नीयं एतच्चाकामतो वेधविषये द्रष्टव्यं दैवादिति विशेषणोपादानात् कामकारे तु वहूना
मपि प्रत्येकं कृत्स्नदोषसंवंधात् कृत्स्नव्रतसंवंधो युक्तः संवर्तेनाभिवधप्रवृत्तेषु कथमेकः तु
स्तव्यापारसमव्यापारात् एकेन तु तो वहूनां च पश्चात् क्रोधतो द्विगुणं स्मृतं इति प्रत्येकं दंडं दै
गुणप्रदर्शनाच्च यदा त्वेकेनैव रोधनादिव्यापारेण वहवो गावो व्यापादितास्तत्र सं
वर्तापस्तंवौ विशेषमाहतुः व्यापन्नानां वहूनां च रोधने वंधनेपि वा भिषग्मिथ्योप
चारे तु द्विगुणं गोव्रतं चरेदिति वहुष्वपि व्यापन्नासु न प्रतिनिमित्तं नैमित्तिकानुष्ठानं
नापि तंत्रेण किं तु वचनवलाद्द्विगुणमेव तथा भिषगपि विरुद्धौषधदाने नैकस्या
प्यकामतो व्यापादने द्विगुणं गोव्रतं कुर्यात् भिषग्व्यतिरिक्तस्यैकवेलापकारार्थं

मि. ता.
प्रा.
१५०

वेत् कृच्छ्रार्द्धं तु भवेत्तत्र भरणार्थं तत्तत्स्मृतं । अतिदाहातिदमनसंधाने चैव योजने वध्या
शृंखलपाशैश्च मरणे पादोनमाचरेत् पालनकरणादेनोपेतापादं चित्याद्यंगिरोवि
शेषस्तेनैवोक्तः । अरण्ये पल्लवे सग्रामे हविधः उतापि वा श्वभ्रे वा पतितेनाकस्मात्तत्राप
देनाभिभूतितात्प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतमुत्तमं । शृंगेन वा तेहतो वा स्यादुद्ध
बन्धस्तोऽपि वा शून्यागारउपेतायां प्राजापत्यं विनिर्दिशेदिति । इदं तु कार्यांतरवि
हेरण्युपेतायां वैदिकेन चो कार्यांतरव्यग्रतयोपेतायां तु द्वैपल्लवोवस्मरणव्याघ्राद्युपा
घातादिनिपातेनैव शुभ्रप्रधानस्य पोषे मरणे कृच्छ्रार्द्धमाचरेत् । अपालितानां तु स्वस्था
शून्यागारउपद्रववत् इति विस्तरणात् । तथा सत्यपि व्यापादने किंचिदुपकारार्थं
ब्रह्मैनो वचनाद्दोषाभावः । यथाह संवर्तः । यंत्रणे गोचिकित्सार्थं गूढगर्भविमो
चने यत्ने कृते विपत्तिः स्यान्न पापेन स लिप्यते इति । यंत्रणं व्याध्यादिनिर्यातना
र्थं संदेशाङ्कुशादि प्रवेशनं । तथा औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु द्विजः । दी
यमाने विपत्तिश्चेन्न पापेन लिप्यते । तथा दाहच्छेदशिरावेधप्रयोगेत्स्रुपकुर्वतां ॥

१५०

द्रुत्स्नहितो गोवध्यादिप्रायश्चित्ते मिश्रपंचप्राजापत्यो यदि रोधादिके हतानतत्न्यप्र
मादापरिजिहीर्षया शस्त्राचतमाणग्रा ल्लेननदादुष्टव्य: अकामकृते नपादस्पृति विशे
षणेन पादानात् पदान नप्रमादासरतणेकरोतिनेदा पादमेके चरोद्रोधेहोपादौ व
धे नेचरेत् पाजनेपादहीने स्पाचरेत्सर्वे निपातनेदुत्यंगिरोहिझ्रेमासिकपादेकिप
दृधिके द्वाविंशत्यहे गोवधव्रतेऊ पीत ग्रायस्तेवेनापि विशेषउक्त: ग्रतिदाहातिवा
हाभ्यां नासिकाछेदने पिवा नदीपर्वतेसरोधान्य्रतेनपादोन माचरेदिति सतणमा
त्रापयोगिनि तृदाहेनदोष: अन्पत्रोकनलतामभ्यां वाहनेमोचनेपिवा सापेसंगोपना
र्थे वनडुष्योद्योधनेधनेदेति परासरस्मरणात् ग्रेकनेस्मिरचिहुकरणेसांडनोपल
तणे वाहनेशास्त्रोक्तमार्गेण रत्तणार्थ मपि नालिकेरादिभिर्वधनेभवत्येवदोष:
ननालिकेरेणशाणवाणेनवापिमौंजेननवद्धेनशृंखले: पतेस्तगावोनमिवध्
नीया :वद्धानतिष्ठेत्परशुरुह्रीताकुशैकाशैश्च वध्रीयान्स्थानेदोषविवर्जितेइति
व्यासस्मरणात् नयान्पोपिविशेषस्तेनेवोक्त: योदाभरणदोषेणविपत्तिर्यस्यगोर्भ

मि॰ ता॰
प्रा॰
१८१
240

नवेदितव्यं नत्रिपादेऽस्य हननेऽर्हद्विगुणाविशेषोदर्शितः विप्रेणसकलेदेयंपादोनंक्ष
त्रियेणतु वैश्येनार्धंपादमेकं शूद्रजातिषुशस्यतइति एतदङ्गिरोवचनं पर्षद्ब्राह्म
णानांचसाराज्ञांद्विगुणामता वैश्यानांत्रिगुणाप्रोक्तापर्षद्वच्चव्रतंस्मृतमितितत्सा
तिलोम्येनविषयंद्रष्टव्यं पाकव्याद्विविषयं तथाशीतिवालवृद्धानांनदहं यनुपनीतस्यवाल
स्यपादइतिवशागङ्कमनुसध्यस्त्रीणांपदासरेणविशेषोभिहितः वपनंनैवनारी
णांनानुव्रज्याजपादिकं नगोष्ठेशयनंतासांनवसीरन्गवाजिनं सर्वान्केशान्समुद्धृ
त्यच्छेदयेदङ्गुलद्वयं सर्वत्रैवहिनारीणांशिरसोमुण्डनंस्मृतमिति ॥ पुरुषेषुविशेषः
संवर्तेनदर्शितः पादेचैवरोमवपनंद्विपादेश्मश्रुणोपिच त्रिपादेतुशिखावर्जंसशिखंतु
निपातनइति पादप्रायश्चित्तार्हस्यकण्ठादधस्तनरोम्णामेववपनंग्रहेप्रायश्चित्तार्हे
स्यतुश्मश्रूणामपिपादोनप्रायश्चित्तार्हस्यपुनः शिरोगतानामपिशिखावर्जिता
नांपादचतुष्टयार्हस्यतुसकलकेशजातस्येति एवमेतद्विगवलेवनेनान्येषामपिस्मृ
तिवचसांविषयोनिरूपणीयः ॥ २ इतिगोवधप्रायश्चित्तप्रकरणं ॥ उपपातकशुद्धिःस्या

१८१

द्विजानां गोहितार्थं च प्रायश्चित्तं न विद्यते अत्र पाराशरोप्याह ग्रामघाते शरौघेण

वेश्मभंगनिपातने अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते रतत्राणार्थं प्रवृत्ते च गृह

दाहे च ये मृता ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते इति इदं च धन रहितस्यैव यथो

कथंचिद्गृहदाहेन मृतिविषयं इतरथा तु आपत्स्वेवोक्तं कान्तारेष्वथ दुर्गेषु गृहदाह

खिलेषु च यदि तत्र विपन्नः स्यात्स्यादप्येको विधीयते तथा स्यादि भंगमरणाभावे पिंड

चित्प्रायश्चित्तमुक्तं अस्थिभंगे गवां कृते लांगूलच्छेदने तथा पातने दंतशृंगाणां मा

सार्द्धं तु यवान् पिबेदिति यत्तु अंगिरसोक्तं शृंगभंगेऽस्थिभंगे वा चर्मावमोचने पि वा

दशरात्रं चरेत्कृच्छ्रं स्वस्थाविप्रदि गोर्भवेत् इति वज्रपात्र वा चूर्णेतो रागिति वर्णनं पक्तो

त्तदशाक्के विषयं इदं च प्रायश्चित्तं गोस्वामिने ब्राह्मणाय पत्र गोसहस्रेण गां दत्वैव कार्यं यथा

ह पराशरः प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकं तस्यानुरूपं मूल्यं वा दद्यादि

त्यब्रवीन्मनुरिति मनुरपि इन्द्रियाणि हिंस्यात्प्राणस्य ज्ञानतोऽज्ञानतोपि वा स्वतस्यो

त्पादयेत्तुष्टिं दद्याद्राज्ञे च तत्समम् इति एतत्पूर्वोक्तं प्रायश्चित्तं जातब्राह्मणस्यावहे ।

मि॰ प्र- स्ट॰ १४२

242

नीचयाजनं कृत्वा त्रीन्कृच्छ्रांश्चरेद्व्यत्याजकोऽभिचरन्नपि सर्वविषयः केवलं परिहीयं
ते न पुनर्विशेषतः पठितं तस्यैवान्यत्रापि विशेषत एव यत्र पुनः प्रायश्चित्तमुच्यते सोऽपि
यथाऽऽह धनार्थं द्रुमच्छेदः शुष्मगुल्मलतावीरुच्छेदने जप्यमृक्शतमिति अतो व्रात्यता
दिष्वस्मिन्नृणास्त्रेणास्त्रातनरेवादिष्टैः प्रायश्चित्तैः महापातकशुद्धिः स्यादेवमित्यादि
ना इति पाठेन च तत्र च तत्स्वरूपस्य समविषमताकल्पनेन विकल्पो विषयविभागो वाऽऽश्रय
णीयः। एतानि च स्मृत्यन्तरोक्तप्रायश्चित्तानि पाठक्रमेण व्रात्यतादेर्भूयो योजयिष्यामः
तत्र व्रात्यतायां मनुनोक्तं येषां द्विजानां सावित्री नानूच्येत यथाविधि तांश्चारयि
त्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति यत्तु यमेन सावित्रीपतिता यस्य दश वर्षाणि पञ्च
च सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः एकविंशतिरात्रं च पिबेत्प्रसृतियावकं
हविषा भोजयेच्चैव ब्राह्मणान्सप्त पञ्च वा ततो यावकशुद्धस्य तस्योपनयनं स्मृतमिति तत्
द्वयमपि याज्ञवल्क्योयमासपर्यन्तविषयम् यत्तु वसिष्ठेनोक्तं पतितसावित्रीक उद्दाल
कव्रतं चरेद्द्वौ मासौ यावकेन वर्तयेन्मासं पयसा पक्षमामिक्षयाऽष्टरात्रं घृतेन षड्रात्रम्।

म

१४२

देवैचांद्रायणेनवा पयसावापिमासेनपराकेणाथवापुनः २ अथानान्येषामुपपा
तकानांप्रायश्चित्तमाह एवमुक्तेनगोवधव्रतेनमासंपंचगव्याशनादिनान्येषांव्रात्यता
दीनामुपपातकानांशुद्धिर्भवेत् चांद्रायणेनवक्ष्यमाणलक्षणेनवामासंपयोव्रतेनवा
पराकेणवाशुद्धिर्भवेत् अत्रातिदेशसामर्थ्यांगोचर्मवसनगोपरिचर्यादिभिर्गोवधसा
धारणैःकतिपयैर्न्यूनत्वमवगम्यते एतच्चव्रतचतुष्टयमकामकारेशक्त्यपेक्षयाविक
ल्पितंद्रष्टव्यं कामकारेतुएतदेवव्रतंकुर्युरुपपातकिनोद्विजाइति अवकीर्णिवर्ज्यंशु
द्ध्यर्थंचांद्रायणमथापिवेतिचमनूक्तंत्रैमासिकंद्रष्टव्यं एतच्चमनुवचनात्प्राय
श्चित्तातिदेशःसर्वेषामुपपातकगणपठितानामुक्तप्रायश्चित्तानामनुक्तप्रायश्चित्तानां
चावकीर्णिवर्जितानामविशेषेणवेदितव्यः अवकीर्णिनस्तुप्रतिपदोक्तमेव नतु
नुक्तप्रायश्चित्तविषयत्वेनातिदेशस्यफलाकांक्षत्वात्यत्रप्रतिपदोक्तप्रायश्चित्तबाधसापेक्ष
त्वप्रसंगात् मैवंनयावत्समस्तोक्तानामुपपातकगणपाठोनर्थकःस्यात् पतितस्यउ
पपातकमध्येसामान्यतःपठितस्यान्यत्रविशेषतःप्रायश्चित्तान्तरमुच्यते यथायाज्या

मि॰ त॰
त॰
२४२

242

येषु नतितिपातपादहान्या प्रायश्चित्तदर्शनात् तथा ताविपादिपरिशुद्धेण टंकानुसा
रेण प्रायश्चित्तान्यूनकल्प्यम् अतः तत्रिपपादग्रहे चौपेयाणमासिके वे श्यपादेग्रहे
मासिके गोवधव्रतं शूद्रपादग्रहे चान्द्रायणं कल्प्यम् एवमन्तरप्रायश्चित्तहानीय ३ ५ वर्षदर्श
नेभापहारधान्यविषये ययिके वधदर्शनात् : अन्नेभ्यो द्वाहरतोभ्यधिके वधः इतिवधद
र्शनात् अन्नेभ्यः पञ्चसहस्रपलपरिमाणः धान्यमाहवर्णेदव्रधने चैतावद्धान्यपरि
मितेन वेदितव्यं अन्नग्रहणेन तदुल्लाधिकमभिधीयते धनग्रहणेन च नान्नरजतादिके ३६
वप्रायश्चित्ते चकामकारविषयं अकामतस्तु त्रैमासिकं गोवधव्रतं तथा मनुष्याणां
च हरणे स्त्रीणां तेन गृहस्य च वापीकूपजलानां च शुद्धिश्चान्द्रायणेन च सार्द्धशतद्व
यपणलभ्यजलापहारे २५ चान्द्रायणप्राप्तमर्षणे गोवधव्रतं निहत्यर्थं विधीयते
तावन्मूल्यजलापहारे पानीयप्रत्यजलस्य च तन्मूल्यान्यूनत्वे हि गुणं ३ इति पञ्चशतं दर
विधानं तावत्परिमाणं ३ चान्द्रायणं पादगोवधाद्दोषहस्तचरितवान् तथा कृच्छ्राति
कृच्छ्रे ३ वयोः पणपञ्चशतं तत्रोति चान्द्रायणविषये पञ्चशतपण ३ विधानाच्छ्रूपत्त्र

२४३

याविद्भिर्न त्रिरात्रमेव भवेत् । अहोरात्रमुपवसेद्भ्रष्टमेधा वस्त्रं गच्छेद्व्रात्यस्तोमेन वा यजेते
ति । एतेषु व्यावस्थाप्यस्योपनेज्ञाद्यभावेन कालातिक्रमे मलस्य याज्ञवल्क्यो पवित्रतानामन्व
तमेषां नयेत्यायाभवति । एतावत्यतिक्रमेऽनुमानं वैरैमासिकेन त्रैवर्षं च दशाब्दपीतुर्द्धं
कि यत्कालातिक्रमे तद्द्वादशवर्षव्रते व्रात्यस्तोमो वेति । ये षोडशपिंडाद्येपोष्टानुपनीतास्ते
षामापस्तंवोक्तं । यस्यपितापितामहादयो नोपनीतास्ते संवत्सरं त्रैवार्षिकं ब्रह्मचर्यं प
स्पर्शयेदिनामहादेनोनुस्मर्यते उपनयने । तस्यद्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यमि
ति । इतिव्रात्यता । तथा स्तेये पशुपातक साधारणप्रायश्चित्ते च नरूपणा यवाटकं प्राय
श्चित्तमनुनोक्तं । धान्यान्नधनचौर्याणि कृत्वा कामाद्विजोत्तमः । स्वजातीयगृहादेव कृ
च्छ्राब्देन विशुध्यतीति । द्विजोत्तमस्य सजातीयो ब्राह्मणः एवं । एतानि विप्रपीरेय हरणाय
देशान्तेसारेण ब्राह्मणस्याप हरणेतिरेतद्विपादेन कृच्छ्रकल्प । गुरुपादमितिनेव पादे
न स्तेये पंकिल्विषं प्रद्युम्नद्विगुणं तरामे नरेषां प्रतिवर्णं विद्युपातिक्रमेदेउ कृच्छ्र
कल्याणमिति । तोयपादेर हर्दिंशात्यदर्शनात् । तथा विशेषमकलेदेयपादोनतोय

२

णकाष्ठकुमारीणां च गुडकान्नस्य गुडस्य च चैलस्य चर्मामिषाणां च विक्रये स्याद्भोजनमि
त्येषां चतुर्णां हीनानां मद्यस्य गजस्य च गुप्तसकाशाल्पफलानां च द्वादशाहं केणङ्गना
गृहाणि पिभक्षणादि द्वादशगुणप्रायश्चित्तदर्शनात् तन्न्यूनत्वं द्वादशगुणमूल्य मत्स्काफला
नां च द्वादशाहं कणभक्षणापहारे द्रष्टव्यमिदं भक्षणादि त्रिगुणं त्रिगुणं द्विरात्रप्रायश्चि
त्तदर्शनात् तन्न्यूनत्वात् द्वादशगुणमूल्यमणिमुक्ताप्रपहारे प्रायश्चित्तमिदं द्रष्ट
व्यं तथा कार्पासकीटजोर्णानां द्विशफैकशफस्य च पत्रिगन्धौषधीनां च रज्वाश्चैव त्र्य
हं पयः तत्राणिभक्षणादि त्रिगुणप्रायश्चित्तदर्शनात् त्रिगुणमूल्यानामपहारे वै तत्प्रा
यश्चित्तं त्रिगुणमाणद्रव्यस्य न्यूनाधिकभावेन प्रायश्चित्तानल्पमहत्त्वे कल्प्यमेव इदं चैत
त्प्रायश्चित्तमपहृतद्रव्यदानोत्तरकालं पवं द्रष्टव्यं यथाह विष्णुः द्रव्यापहर्तेद्र
व्यं स्वामिने वृत्तमाचरेदिति कृच्छ्रमपकरणं त्र्यपोह्य कृच्छ्रं देयमिति विहितेन स्तेनपा
कं गेणाव तथा वैदिकस्य वजायमानो वै ब्राह्मणः इत्येतद्वाकेन ऋणसंस्तुतपञ्जायकरेण
च उपपातकशुद्धिः स्यादेवं मित्रादिनोक्तोपपातकसामान्यविहितव्रतं च त्रष्टयेणा

तविधादि द्रव्यापहारे द्रष्टव्यो ब्राह्मणसंवेधे द्रव्यापहारेण निक्षेपस्यापहरणे न रा
शुरजनस्य च भ्रष्टगैसवज्रमणीनां च रूवमस्तेयप्रसंगस्तं स्मिति द्रष्टव्यो तथा द्रव्या
णामल्पसाराणां स्तेये कृतान्यवेयमनः चरेत्सांतपने कृच्छ्रे नन्निर्यातयात्मशुद्धय
इत्यनेनाल्पप्रयोजनद्रुपुसीसकादि द्रव्यापहारविशेषेण स्तेयसामान्ये नेप्रपातक
प्रायश्चित्तापवादः इदं च चांद्रायणनिमित्तोभ्यनार्द्र इत्तो यश्चात मल्पस्य पंचदशगो
णाद्वात्रपुसीसकाशगयपहारे प्रायश्चित्तं चांद्रायणं पंचदशगोशतात्मस्य तथाद्रव्य
विशेषेण पुप्रपातकसामान्यप्राप्त प्रत्तापवादः भक्ष्यभोज्यापहरणे यानशय्या
सनस्य च पुष्पमूलफलानां च पंचगव्यो विशोधनमिति एकवारभोजनपर्याप्त भक्ष्य
भोज्यापहारइदं द्विवारभोजनपर्याप्तापहारे तु त्रिरात्रं यथाह पैठीनसिः भक्ष्य
भोज्यान्नस्योदरपूरणमात्रहरणे त्रिरात्रमेकरात्रं वा पंचगव्यापहारेनेति यानादी
नामप्येतत्साहचर्याद् एतावन्मूल्यानामेवापहरणे एतत्प्रायश्चित्तं सर्वत्रापहृत
मानद्रव्यानुरूपार्थभावेन प्रायश्चित्तस्यापि गुरुलघुभावः कल्पनीयः तथा न्र

वासः शुक्लकृष्णपीतवस्त्रविक्रये त्रिदिनं गजानामेदवंविगाश्वाशुनरष्टकरकरभा
णां पाराकः शुनाद्विशफाणां पक्षाहाद्वं विक्रये चान्द्रायणं शृंगाणां पाराकः स्नेनोमो
कृच्छ्रं इतिहासपुराणानां सोमपाने रहस्यानां कृच्छ्रं गाथानीतिशास्त्रतन्त्रविद्यापाद
कृच्छ्रं पण्यानां विक्रये च स्मृत्यन्तरे विशेष उक्तः। यथाह हारीतः। गुडतिलाक्षुपुष्प
मूलफलपक्वान्नविक्रये सोमपानां सोमपाने सौम्यकृच्छ्रः लाक्षालवणमधुमांसते
लक्षीरदधिघृततक्रगंधचर्मवाससामन्यतमविक्रये चान्द्रायणं तथोर्णाकेशकेसरिस्म
धेनुवेष्याश्मशास्त्रविक्रये च मत्स्यमांसस्नाय्वस्थिशृंगखड्गनखत्वङ्नीलीविक्रये तप्तकृ
च्छ्रः हिंगुगुग्गुलहरितालमनःशिलाञ्जनगैरिकताम्रलवणमणिमुक्ताप्रवालवैण
